# || श्रीमद् भगवद्गीता ||
## Sanskrit Edition for Self Learning

प्रथमोऽध्यायः - अर्जुनविषादयोगः 2
द्वितीयोऽध्यायः - सांख्य योगः 7
तृतीयोऽध्यायः - कर्म योगः 15
चतुर्थोऽध्यायः - ज्ञानकर्मसंन्यासयोग 20
पंचमोऽध्यायः - कर्मसंन्यासयोगः 25
षष्ठोऽध्यायः - आत्मसंयमयोगः 29
अथ सप्तमोऽध्यायः - ज्ञानविज्ञानयोगः 35
अष्टमोऽध्यायः - अक्षरब्रह्मयोगः 39
नवमोऽध्यायः - राजविद्याराजगुह्ययोगः 43
दशमोऽध्याय - विभूतियोगः 47
अथएकादशोऽध्यायः - विश्वरूपदर्शनयोगः 52
द्वादशोऽध्यायः - भक्तियोगः 60
त्रयोदशोऽध्यायः - क्षेत्रक्षेत्रज्ञयोगः 63
चतुर्दशोऽध्यायः - गुणत्रयविभागयोगः 67
पंचदशोऽध्यायः - पुरुषोत्तमयोगः 70
षोडशोऽध्यायः - दैवासुर संपद्विभागयोगः 73
सप्तदशोऽध्यायः - श्रद्धात्रयविभाग योगः 76
अष्टादशोऽध्यायः - मोक्षसंन्यास योगः 79

|| ॐ श्री ||

# श्रीमद् भगवद्गीता

Dedicating this editing and compilation work in Sanskrit at the feet of my mother, for being the only inspiration towards my spiritual wellbeing and the Sadhana of self learning and all my dearest Gurus who were instrumental towards my success in different forms.

श्रीलक्ष्मी गौतम्

|| ॐ श्री ||

# स्वर साधना - श्रीमद् भगवद्गीता

## प्रथमोऽध्यायः - अर्जुनविषादयोगः

---

ॐ श्रीकृष्णपरब्रह्मणे नमः | श्रीमद्भगवद्गीता |अथ प्रथमोऽध्यायः || अर्जुनविषादयोगः ||

धृतराष्ट्र उवाच

धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः ।
मामकाः पांडवाश्चैव किमकुर्वत संजय ॥ १ ॥

संजय उवाच

दृष्ट्वा तु पांडवानीकं व्यूढं(न्) दुर्योधनस्तदा ।
आचार्यमुपसंगम्य राजा वचनमब्रवीत् ॥ २ ॥
पश्यैतां पांडुपुत्राणामा(म्+आ)चार्य महतीं(ञ्) चमूम् ।
व्यूढां(न्) द्रुपदपुत्रेण तव शिष्येण धीमता ॥ ३ ॥
अत्र शूराः महेष्वासा भीमार्जुनसमा युधि ।
युयुधानो विराटश्च द्रुपदश्च महारथः ॥ ४ ॥
धृष्टकेतुश्चेकितानः काशिराजश्च वीर्यवान् ।
पुरुजित् कुंतिभोजश्च शैब्यश्च नरपुंगवः ॥ ५ ॥
युधामन्युश्च विक्रांत उत्तमौजाश्च वीर्यवान् ।
सौभद्रो द्रौपदेयाश्च सर्व एव महारथाः ॥ ६ ॥
अस्माकं(न्) तु विशिष्टा ये तान्निबोध द्विजोत्तम ।
नायका मम सैन्यस्य संज्ञार्थं(न्) तान् ब्रवीमि ते ॥ ७ ॥
भवान् भीष्मश्च कर्णश्च कृपश्च समितिंजयः ।
अश्वत्थामा विकर्णश्च सौमदत्तिस्तथैव च ॥ ८ ॥

अन्ये च बहवः शूरा(ः) मदर्थे त्यक्तजीविताः ।
नानाशस्त्रप्रहरणाः सर्वे युद्धविशारदाः ॥ ९ ॥
अपर्याप्तं(न्) तदस्माकं बलं भीष्माभिरक्षितम् ।
पर्याप्तं(न्) त्विदमेतेषां बलं भीमाभिरक्षितम् ॥ १० ॥
अयनेषु च सर्वेषु यथाभागमवस्थिताः ।
भीष्ममेवाभिरक्षंतु भवंतः सर्व एव हि ॥ ११ ॥
तस्य संजनयन् हर्षं(ङ्) कुरुवृद्धः पितामहः ।
सिंहनादं विनद्योच्चैः शंखं(न्) दध्मौ प्रतापवान् ॥ १२ ॥
ततः शंखाश्च भेर्यश्च पणवानकगोमुखाः ।
सहसैवाभ्यहन्यंत स शब्दस्तुमुलोऽभवत् ॥ १३ ॥
ततः श्वेतैर्हयैर्युक्ते महति स्यंदने स्थितौ ।
माधवः पांडवश्चैव दिव्यौ शंखौ प्रदध्मतुः ॥ १४ ॥
पांचजन्यं हृषीकेशो देवदत्तं(न्) धनंजयः ।
पौंड्रं(न्) दध्मौ महाशंखं भीमकर्मा वृकोदरः ॥ १५ ॥
अनंतविजयं राजा कुंतीपुत्रो युधिष्ठिरः ।
नकुलः सहदेवश्च सुघोषमणिपुष्पकौ ॥ १६ ॥
काश्यश्च परमेष्वासः शिखंडी च महारथः ।
धृष्टद्युम्नो विराटश्च सात्यकिश्चापराजितः ॥ १७ ॥
द्रुपदो द्रौपदेयाश्च सर्वशः पृथिवीपते ।
सौभद्रश्च महाबाहुः शंखान् दध्मुः पृथक् पृथक् ॥ १८ ॥
स घोषो धार्तराष्ट्राणां हृदयानि व्यदारयत् ।
नभश्च पृथिवीं(ञ्) चैव तुमुलो व्यनुनादयन् ॥ १९ ॥
अथ व्यवस्थितान् दृष्ट्वा धार्तराष्ट्रान् कपिध्वजः ।

प्रवृत्ते शस्त्रसंपाते धनुरुद्यम्य पांडवः ॥ २० ॥
हृषीकेशं(न्) तदा वाक्यमि(म्+इ)दमाह महीपते ।

अर्जुन उवाच
सेनयोरुभयोर्मध्ये रथं स्थापय मेऽच्युत ॥ २१ ॥
यावदेतान्निरीक्षेऽहं योद्धुकामानवस्थितान् ।
कैर्मया सह योद्धव्यम(म्+अ)स्मिन् रणसमुद्यमे ॥ २२ ॥
योत्स्यमानानवेक्षेऽहं य एतेऽत्र समागताः ।
धार्तराष्ट्रस्य दुर्बुद्धेर्यु(द्धेः+यु)द्धे प्रियचिकीर्षवः ॥ २३ ॥

संजय उवाच
एवमुक्तो हृषीकेशो गुडाकेशेन भारत ।
सेनयोरुभयोर्मध्ये स्थापयित्वा रथोत्तमम् ॥ २४ ॥
भीष्मद्रोण प्रमुखतः सर्वेषां(ञ्) च महीक्षिताम् ।
उवाच पार्थ पश्यैतान् समवेतान् कुरूनिति ॥ २५ ॥
तत्रापश्यत् स्थितान् पार्थः पितृनथ पितामहान् ।
आचार्यान्मातुलान्भ्रातृन् पुत्रान् पौत्रान् सखींस्तथा ॥ २६ ॥
श्वशुरान् सुहृदश्चैव सेनयोरुभयोरपि ।
तान्समीक्ष्य स कौंतेयः सर्वान्बंधूनवस्थितान् ॥ २७ ॥
कृपया परयाविष्टो विषीदन्निदमब्रवीत् ।

अर्जुन उवाच
दृष्ट्वेमं स्वजनं(ङ्) कृष्ण युयुत्सुं समुपस्थितम् ॥ २८ ॥
सीदंति मम गात्राणि मुखं(ञ्) च परिशुष्यति ।

वेपथुश्च शरीरे मे रोमहर्षश्च जायते ॥ २९ ॥
गांडीवं स्रंसते हस्तात् त्वक्चैव परिदह्यते ।
न च शक्नोम्यवस्थातुं भ्रमतीव च मे मनः ॥ ३० ॥
निमित्तानि च पश्यामि विपरीतानि केशव ।
न च श्रेयोऽनुपश्यामि हत्वा स्वजनमाहवे ॥ ३१ ॥
न कांक्षे विजयं(ङ्) कृष्ण न च राज्यं सुखानि च ।
किं(न्) नो राज्येन गोविंद किं भोगैर्जीवितेन वा ॥ ३२ ॥
येषामर्थे कांक्षितं(न्) नो राज्यं भोगाः सुखानि च ।
त इमेऽवस्थिता युद्धे प्राणांस्त्यक्त्वा धनानि च ॥ ३३ ॥
आचार्याः पितरः पुत्रास्त(त्राः+त)थैव च पितामहाः ।
मातुलाः श्वशुराः पौत्राः श्यालाः संबंधिनस्तथा ॥ ३४ ॥
एतान्न हंतुमिच्छामि घ्नतोऽपि मधुसूदन ।
अपि त्रैलोक्यराज्यस्य हेतोः किं(न्) नु महीकृते ॥ ३५ ॥
निहत्य धार्तराष्ट्रान्नः का प्रीतिः स्याज्जनार्दन ।
पापमेवाश्रयेदस्मान् हत्वैतानाततायिनः ॥ ३६ ॥
तस्मान्नार्हा वयं हंतुं(न्) धार्तराष्ट्रान् स्वबांधवान् ।
स्वजनं हि कथं हत्वा सुखिनः स्याम माधव ॥ ३७ ॥
यद्यप्येते न पश्यंति लोभोपहतचेतसः ।
कुलक्षयकृतं(न्) दोषं मित्रद्रोहे च पातकम् ॥ ३८ ॥
कथं(न्) न ज्ञेयमस्माभिः पापादस्मान्निवर्तितुम् ।
कुलक्षयकृतं(न्) दोषं प्रपश्यद्भिर्जनार्दन ॥ ३९ ॥
कुलक्षये प्रणश्यंति कुलधर्माः सनातनाः ।
धर्मे नष्टे कुलं कृत्स्नम(म्+अ)धर्मोऽभिभवत्युत ॥ ४० ॥

अधर्माभिभवात् कृष्ण प्रदुष्यंति कुलस्त्रियः ।
स्त्रीषु दुष्टासु वार्ष्णेय जायते वर्णसंकरः ॥ ४१ ॥
संकरो नरकायैव कुलघ्नानां(ङ्) कुलस्य च ।
पतंति पितरो ह्येषां लुप्तपिंडोदकक्रियाः ॥ ४२ ॥
दोषैरेतैः कुलघ्नानां वर्णसंकरकारकैः ।
उत्साद्यंते जातिधर्माः कुलधर्माश्च शाश्वताः ॥ ४३ ॥
उत्सन्नकुलधर्माणां मनुष्याणां(ञ्) जनार्दन ।
नरकेऽनियतं वासो भवतीत्यनुशुश्रुम ॥ ४४ ॥
अहो बत महत्पापं(ङ्) कर्तुं व्यवसिता वयम् ।
यद्राज्यसुखलोभेन हंतुं स्वजनमुद्यताः ॥ ४५ ॥
यदि मामप्रतीकारम(म्+अ)शस्त्रं शस्त्रपाणयः ।
धार्तराष्ट्रा रणे हन्युस्त(न्युः+त)न्मे क्षेमतरं भवेत् ॥ ४६ ॥

संजय उवाच
एवमुक्त्वार्जुनः संख्ये रथोपस्थ उपाविशत् ।
विसृज्य सशरं(ञ्) चापं शोकसंविग्नमानसः ॥ ४७ ॥

ओं तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे **अर्जुनविषादयोगोनाम प्रथमोऽध्यायः** ॥ १ ॥

---

|| ॐ श्री ||

# स्वर साधना - श्रीमद् भगवद्गीता

## द्वितीयोऽध्यायः - सांख्य योगः

---

ओं श्रीकृष्णपरब्रह्मणे नमः / श्रीमद्भगवद्गीता /अथ द्वितीयोऽध्यायः || सांख्य योगः ||

संजय उवाच

तं(न्) तथा कृपयाविष्टम(म्+अ)श्रुपूर्णाकुलेक्षणम् ।
विषीदंतमिदं वाक्यमु(म्+उ)वाच मधुसूदनः ॥ १ ॥

श्रीभगवानुवाच

कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम् ।
अनार्यजुष्टमस्वर्ग्यम(म्+अ)कीर्तिकरमर्जुन ॥ २ ॥

क्लैब्यं मा स्म गमः पार्थ नैतत्त्वय्युपपद्यते ।
क्षुद्रं हृदयदौर्बल्यं(न्) त्यक्त्वोत्तिष्ठ परंतप ॥ ३ ॥

अर्जुन उवाच

कतं भीष्ममहं संख्ये द्रोणं(ञ्) च मधुसूदन ।
इषुभिः प्रतियोत्स्यामि पूजार्हावरिसूदन ॥ ४ ॥

गुरूनहत्वा हि महानुभावान् श्रेयो भोक्तुं भैक्ष्यमपीह लोके ।
हत्वार्थकामांस्तुगुरूनिहैव भुंजीय भोगान् रुधिरप्रदिग्धान् ॥ ५ ॥

न चैतद्विद्मः कतरन्नो गरीयो यद्वा जयेम यदि वा नो जयेयुः ।
यानेव हत्वा न जिजीविषामस्ते(मः+ते)ऽवस्थिताः प्रमुखे धार्तराष्ट्राः
॥६॥

कार्पण्यदोषोपहतस्वभावः पृच्छामि त्वां(न्) धर्मसंमूढचेताः ।
यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे शिष्यस्तेऽहं शाधि मां(न्)त्वां
प्रपन्नम् ॥७॥

न हि प्रपश्यामि ममापनुद्याद्य(त्+य)च्छोकमुच्छोषणमिंद्रियाणाम् ।
अवाप्य भूमावसपत्नमृद्धं राज्यं सुराणामपि चाधिपत्यम् ॥ ८ ॥

संजय उवाच
एवमुक्त्वा हृषीकेशं(ङ्) गुडाकेशः परंतप ।
न योत्स्य इति गोविंदमु(म्+उ)क्त्वा तूष्णीं बभूव ह ॥ ९ ॥
तमुवाच हृषीकेशः प्रहसन्निव भारत ।
सेनयोरुभयोर्मध्ये विषीदंतमिदं वचः ॥ १० ॥

श्रीभगवानुवाच
अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे ।
गतासूनगतासूंश्च नानुशोचंति पंडिताः ॥ ११ ॥
न त्वेवाहं(ञ्) जातु नासं(न्) न त्वं(न्) ने मे जनाधिपाः ।
न चैव न भविष्यामः सर्वे वयमतः परम् ॥ १२ ॥
देहिनोऽस्मिन्यथा देहे कौमारं यौवनं(ञ्) जरा ।
तथा देहांतरप्राप्तिर्धी (प्तिः+धी)र स्तत्र न मुह्यति ॥ १३ ॥
मात्रास्पर्शास्तु कौंतेय शीतोष्णसुखदुःखदाः ।
आगमापायिनोऽनित्यास्तां(त्याः+तान्)स्तितिक्षस्व भारत ॥ १४॥
यं हि न व्यथयंत्येते पुरुषं पुरुषर्षभ ।
समदुःखसुखं(न्) धीरं सोऽमृतत्वाय कल्पते ॥ १५ ॥

नासतो विद्यते भावो नाभावो विद्यते सतः ।
उभयोरपि दृष्टोऽंतस्त्व(तः+त्व)नयोस्तत्त्वदर्शिभिः ॥ १६ ॥
अविनाशि तु तद्विद्धि येन सर्वमिदं(न्) ततम् ।
विनाशमव्ययस्यास्य न कश्चित्कर्तुमर्हति ॥ १७ ॥
अंतवंत इमे देहा नित्यस्योक्ताः शरीरिणः ।
अनाशिनोऽप्रमेयस्य तस्माद्युध्यस्व भारत ॥ १८ ॥
य एनं वेत्ति हंतारं यश्चैनं मन्यते हतम् ।
उभौ तौ न विजानीतो नायं हंति न हन्यते ॥ १९ ॥
न जायते म्रियते वा कदाचिन्ना(त्+ना)यं भूत्वा भविता वा न भूयः ।
अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे ॥ २० ॥
वेदा विनाशिनं(न्) नित्यं य एनमजमव्ययम् ।
कथं स पुरुषः पार्थ कं(ङ्) घातयति हंति कम् ॥ २१ ॥

वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि ।तथा
शरीराणि विहाय जीर्णान्य(नि+अ)न्यानि संयाति नवानि देही ॥ २२ ॥

नैनं(ञ्) छिंदंति शस्त्राणि नैनं(न्) दहति पावकः ।
न चैनं(ङ्)क्लेदयंत्यापो न शोषयति मारुतः ॥ २३ ॥
अच्छेद्योऽयमदाह्योऽयम(म्+अ)क्लेद्योऽशोष्य एव च ।
नित्यः सर्वगतः स्थाणुर(णुः+अ)चलोऽयं सनातनः ॥ २४ ॥
अव्यक्तोऽयमचिंत्योऽयम(म्+अ)विकार्योऽयमुच्यते ।
तस्मादेवं विदित्वैनं(न्) नानुशोचितुमर्हसि ॥ २५ ॥

अथ चैनं(न्) नित्यजातं(न्) नित्यं वा मन्यसे मृतम् ।
तथापि त्वं महाबाहो नैवं शोचितुमर्हसि ॥ २६ ॥
जातस्य हि ध्रुवो मृत्युर्ध्रु(त्युः+ध्रु)वं(ञ्) जन्म मृतस्य च ।
तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि ॥ २७ ॥
अव्यक्तादीनि भूतानि व्यक्त मध्यानि भारत ।
अव्यक्तनिधनान्येव तत्र का परिदेवना ॥ २८ ॥
आश्चर्यवत्पश्यति कश्चिदेनमा(म्+आ)श्चर्यवद्वदति तथैव चान्यः ।
आश्चर्यवच्चैनमन्यः शृणोति श्रुत्वाप्येनं वेद न चैव कश्चित् ॥ २९॥
देही नित्यमवध्योऽयं(न्) देहे सर्वस्य भारत ।
तस्मात्ससर्वाणि भूतानि न त्वं शोचितुमर्हसि ॥ ३० ॥
स्वधर्ममपि चावेक्ष्य न विकंपितुमर्हसि ।
धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत् क्षत्रियस्य न विद्यते ॥ ३१ ॥
यदृच्छया चोपपन्नं स्वर्गद्वारमपावृतम् ।
सुखिनः क्षत्रियाः पार्थ लभंते युद्धमीदृशम् ॥ ३२ ॥
अथ चेत्त्वमिमं(न्) धर्म्यं संग्रामं(न्) न करिष्यसि ।
ततः स्वधर्मं(ङ्) कीर्तिं(ञ्) च हित्वा पापमवाप्स्यसि ॥ ३३ ॥
अकीर्तिं(ञ्) चापि भूतानि कथयिष्यंति तेऽव्ययाम् ।
संभावितस्य चाकीर्तिम(र्तिः+म)रणादतिरिच्यते ॥ ३४ ॥
भयाद्रणादुपरतं मंस्यंते त्वां महारथाः ।
येषां(ञ्) च त्वं बहुमतो भूत्वा यास्यसि लाघवम् ॥ ३५ ॥
अवाच्यवादांश्च बहून्व(न्+व)दिष्यंति तवाहिताः ।
निंदंतस्तव सामर्थ्यं(न्) ततो दुःखतरं(न्) नु किम् ॥ ३६ ॥

हतो वा प्राप्स्यसि स्वर्गं(ञ्) जित्वा वा भोक्ष्यसे महीम् ।
तस्मादुत्तिष्ठ कौंतेय युद्धाय कृतनिश्चयः ॥ ३७ ॥
सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ ।
ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि ॥ ३८ ॥
एषा तेऽभिहिता सांख्ये बुद्धिर्योगे त्विमां शृणु ।
बुद्ध्या युक्तो यया पार्थ कर्मबंधं प्रहास्यसि ॥ ३९ ॥
नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते ।
स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् ॥ ४० ॥
व्यवसायात्मिका बुद्धिरे(द्धिः+ए)केह कुरुनंदन ।
बहुशाखा ह्यनंताश्च बुद्धयोऽव्यवसायिनाम् ॥ ४१ ॥
यामिमां पुष्पितां वाचं प्रवदंत्यविपश्चितः ।
वेदवादरताः पार्थ नान्यदस्तीति वादिनः ॥ ४२ ॥
कामात्मानः स्वर्गपरा जन्मकर्मफलप्रदाम् ।
क्रियाविशेषबहुलां भोगैश्वर्यगतिं प्रति ॥ ४३ ॥
भोगैश्वर्यप्रसक्तानां तयापहृतचेतसाम् ।
व्यवसायात्मिका बुद्धिः समाधौ न विधीयते ॥ ४४ ॥
त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन ।
निर्द्वंद्वो नित्यसत्त्वस्थो निर्योगक्षेम आत्मवान् ॥ ४५ ॥
यावानर्थ उदपाने सर्वतः संप्लुतोदके ।
तावान्सर्वेषु वेदेषु ब्राह्मणस्य विजानतः ॥ ४६ ॥
कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।
मा कर्मफलहेतुर्भूर्मा(भूः+मा) ते संगोऽस्त्वकर्मणि ॥ ४७ ॥

योगस्थः कुरु कर्माणि संगं(न्) त्यक्त्वा धनंजय ।
सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते ॥ ४८ ॥
दूरेण ह्यवरं(ङ्) कर्म बुद्धियोगाद्धनंजय ।
बुद्धौ शरणमन्विच्छ कृपणाः फलहेतवः ॥ ४९ ॥
बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते ।
तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम् ॥ ५० ॥
कर्मजं बुद्धियुक्ता हि फलं(न्) त्यक्त्वा मनीषिणः ।
जन्मबंधविनिर्मुक्ताः पदं(ङ्) गच्छंत्यनामयम् ॥ ५१ ॥
यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति ।
तदा गंतासि निर्वेदं श्रोतव्यस्य श्रुतस्य च ॥ ५२ ॥
श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला ।
समाधावचला बुद्धिस्त(द्धिः+त)दा योगमवाप्स्यसि ॥ ५३ ॥

अर्जुन उवाच
स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव ।
स्थितधीः किं प्रभाषेत किमासीत व्रजेत किम् ॥ ५४ ॥

श्री भगवानुवाच
प्रजहाति यदा कामान् सर्वान् पार्थ मनोगतान् ।
आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ॥ ५५ ॥
दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः ।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ॥ ५६ ॥

यः सर्वत्रानभिस्नेहस्त(हः+त)त्तत्प्राप्य शुभाशुभम् ।
नाभिनंदति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ॥ ५७ ॥
यदा संहरते चायं(ङ्) कूर्मोऽंगानीव सर्वशः ।
इंद्रियाणींद्रियार्थेभ्यस्त(भ्यः+त)स्य प्रज्ञा प्रतिष्ठिता ॥ ५८ ।
विषया विनिवर्तंते निराहारस्य देहिनः ।
रसवर्जं रसोऽप्यस्य परं(न्) दृष्ट्वा निवर्तते ॥ ५९ ॥
यततोह्यपि कौंतेय पुरुषस्य विपश्चितः ।
इंद्रियाणि प्रमाथीनि हरंति प्रसभं मनः ॥ ६० ॥
तानि सर्वाणि संयम्य युक्त आसीत मत्परः ।
वशे हि यस्येंद्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ॥ ६१ ॥
ध्यायतो विषयान्पुंसः संगस्तेषूपजायते ।
संगात्संजायते कामः कामात्क्रोधोऽभिजायते ॥ ६२ ॥
क्रोधाद्भवति संमोहः संमोहात् स्मृतिविभ्रमः ।
स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ॥ ६३ ॥
रागद्वेषवियुक्तैस्तु विषयानिंद्रियैश्चरन् ।
आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति ॥ ६४ ॥
प्रसादे सर्वदुःखानां हानिरस्योपजायते ।
प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते ॥ ६५ ॥
नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना ।
न चाभावयतः शांतिर(तिः+अ)शांतस्य कुतः सुखम् ॥ ६६ ॥
इंद्रियाणां हि चरतां यन्मनोऽनु विधीयते ।
तदस्य हरति प्रज्ञां वायुर्नावमिवांभसि ॥ ६७ ॥

तस्माद्यस्य महाबाहो निगृहीतानि सर्वशः ।
इंद्रियाणींद्रियार्थेऽभ्यस्त(भ्यः+त)स्य प्रज्ञा प्रतिष्ठिता ॥ ६८ ॥

या निशा सर्वभूतानां(न्) तस्यां(ञ्) जागर्ति संयमी ।
यस्यां(ञ्) जाग्रति भूतानि सा निशा पश्यतो मुनेः ॥ ६९ ॥

आपूर्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशंति यद्वत् ।
तद्वत्कामा यं प्रविशंति सर्वे स शांतिमाप्नोति न कामकामी ॥ ७० ॥

विहाय कामान्यः सर्वान् पुमांश्चरति निःस्पृहः ।
निर्ममो निरहंकारः स शांतिमधिगच्छति ॥ ७१ ॥

एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति ।
स्थित्वास्यामंतकालेऽपि ब्रह्मनिर्वाणमृच्छति ॥ ७२ ॥

ओं तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे **सांख्ययोगोनाम द्वितीयोऽध्यायः** ॥ २ ॥

---

॥ ॐ श्री ॥

# स्वर साधना - श्रीमद् भगवद्गीता

## तृतीयोऽध्यायः - कर्म योगः

---

ओं श्रीकृष्णपरब्रह्मणे नमः / श्रीमद्भगवद्गीता /अथ तृतीयोऽध्यायः ॥ कर्म योगः॥

अर्जुन उवाच

ज्यायसी चेत्कर्मणस्ते मता बुद्धिर्जनार्दन ।
तत्किं(ङ्) कर्मणि घोरे मां(न्) नियोजयसि केशव ॥ १ ॥

व्यामिश्रेणेव वाक्येन बुद्धिं मोहयसीव मे ।
तदेकं वद निश्चित्य येन श्रेयोऽहमाप्नुयाम् ॥ २ ॥

श्री भगवानुवाच

लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयानघ ।
ज्ञानयोगेन सांख्यानां(ङ्) कर्मयोगेन योगिनाम् ॥ ३ ॥

न कर्मणामनारंभान्नै(त्+नै)ष्कर्म्यं पुरुषोऽश्नुते ।
न च संन्यसनादेव सिद्धिं समधिगच्छति ॥ ४ ॥

न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत् ।
कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः ॥ ५ ॥

कर्मेंद्रियाणि संयम्य य आस्ते मनसा स्मरन् ।
इंद्रियार्थान् विमूढात्मा मिथ्याचारः स उच्यते ॥ ६ ॥

यस्त्विंद्रियाणि मनसा नियम्यारभतेऽर्जुन ।
कर्मेंद्रियैः कर्मयोगम(म्+अ)सक्तः स विशिष्यते ॥ ७ ॥

नियतं(ङ्) कुरु कर्म त्वं(ङ्) कर्म ज्यायो ह्यकर्मणः ।
शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मणः ॥ ८ ॥

यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं(ङ्) कर्मबंधनः ।
तदर्थं(ङ्) कर्म कौंतेय मुक्तसंगः समाचर ॥ ९ ॥

सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः ।
अनेन प्रसविष्यध्वमे(म्+ए)ष वोऽस्त्विष्टकामधुक् ॥ १० ॥
देवान् भावयतानेन ते देवा भावयंतु वः ।
परस्परं भावयंतः श्रेयः परमवाप्स्यथ ॥ ११ ॥
इष्टान् भोगान् हि वो देवा दास्यंते यज्ञभाविताः ।
तैर्दत्तानप्रदायैभ्यो यो भुंक्ते स्तेन एव सः ॥ १२ ॥
यज्ञशिष्टाशिनः संतो मुच्यंते सर्वकिल्बिषैः ।
भुंजते ते त्वघं पापा ये पचंत्यात्मकारणात् ॥ १३ ॥
अन्नाद्भवंति भूतानि पर्जन्यादन्नसंभवः ।
यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः ॥ १४ ॥
कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवम् ।
तस्मात् सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम् ॥ १५ ॥
एवं प्रवर्तितं(ञ्) चक्रं(न्) नानुवर्तयतीह यः ।
अघायुरिंद्रियारामो मोघं पार्थ स जीवति ॥ १६ ॥
यस्त्वात्मरतिरेव स्यादा(त्+आ)त्मतृप्तश्च मानवः ।
आत्मन्येव च संतुष्टस्त(ष्टः+त)स्य कार्यं(न्) न विद्यते ॥१७॥
नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन ।
न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः ॥ १८ ॥
तस्मादसक्तः सततं(ङ्) कार्यं(ङ्) कर्म समाचर ।
असक्तो ह्याचरन् कर्म परमाप्नोति पूरुषः ॥ १९ ॥

कर्मणैव हि संसिद्धिमा(म्+आ)स्थिता जनकादयः ।
लोकसंग्रहमेवापि संपश्यन् कर्तुमर्हसि ॥ २० ॥
यद्यदाचरति श्रेष्ठस्त(ष्टः+त)त्तदेवेतरो जनः ।
स यत्प्रमाणं(ङ्) कुरुते लोकस्तदनुवर्तते ॥ २१ ॥
न मे पार्थास्ति कर्तव्यं(न्) त्रिषु लोकेषु किंचन ।
नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि ॥ २२ ॥

यदि ह्यहं(न्) न वर्तेयं(ञ्) जातु कर्मण्यतंद्रितः ।
मम वर्त्मानुवर्तंते मनुष्याः पार्थ सर्वशः ॥ २३ ॥
उत्सीदेयुरिमे लोका न कुर्यां(ङ्) कर्म चेदहम् ।
संकरस्य च कर्तास्यामु(म्+उ)पहन्यामिमाः प्रजाः ॥ २४ ॥
सक्ताः कर्मण्यविद्वांसो यथा कुर्वंति भारत ।
कुर्याद्विद्वांस्तथासक्तश्चि(क्तः+चि)कीर्षुर्लोकसंग्रहम् ॥ २५ ॥
न बुद्धिभेदं(ञ्) जनयेद(त्+अ)ज्ञानां(ङ्) कर्मसंगिनाम् ।
जोषयेत्सर्वकर्माणि विद्वान्युक्तः समाचरन् ॥ २६ ॥
प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः ।
अहंकारविमूढात्मा कर्ताहमिति मन्यते ॥ २७ ॥
तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः ।
गुणा गुणेषु वर्तंत इति मत्वा न सज्जते ॥ २८ ॥
प्रकृतेर्गुणसंमूढाः सज्जंते गुणकर्मसु ।
तानकृत्स्नविदो मंदान् कृत्स्नविन्न विचालयेत् ॥ २९ ॥
मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा ।
निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः ॥ ३० ॥

ये मे मतमिदं(न्) नित्यम(म्+अ)नुतिष्ठंति मानवाः ।
श्रद्धावंतोऽनसूयंतो मुच्यंते तेऽपि कर्मभिः ॥ ३१ ॥
ये त्वेतदभ्यसूयंतो नानुतिष्ठंति मे मतम् ।
सर्वज्ञानविमूढांस्तान्वि(न्+वि)द्धि नष्टानचेतसः ॥ ३२ ॥
सदृशं(ञ्) चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि ।
प्रकृतिं यांति भूतानि निग्रहः किं(ङ्) करिष्यति ॥ ३३ ॥
इंद्रियस्येंद्रियस्यार्थे रागद्वेषौ व्यवस्थितौ ।
तयोर्न वशमागच्छेत्तौ(त्+तौ) ह्यस्य परिपंथिनौ ॥ ३४ ॥
श्रेयान् स्वधर्मो विगुणः परधर्मात् स्वनुष्ठितात् ।
स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ॥ ३५ ॥

अर्जुन उवाच
अथ केन प्रयुक्तोऽयं पापं(ञ्) चरति पूरुषः ।
अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः ॥ ३६ ॥

श्रीभगवानुवाच
काम एष क्रोध एष रजोगुणसमुद्भवः ।
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम् ॥ ३७ ॥
धूमेनाव्रियते वह्निर्य(ह्निः+य)थादर्शो मलेन च ।
यथोल्बेनावृतो गर्भस्त(र्भः+त)था तेनेदमावृतम् ॥ ३८ ॥
आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा ।
कामरूपेण कौंतेय दुष्पूरेणानलेन च ॥ ३९ ॥

इंद्रियाणि मनो बुद्धिर(द्धिः+अ)स्याधिष्ठानमुच्यते ।
एतैर्विमोहयत्येष ज्ञानमावृत्य देहिनम् ॥ ४० ॥
तस्मात्त्वमिंद्रियाण्यादौ नियम्य भरतर्षभ ।
पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम् ॥ ४१ ॥
इंद्रियाणि पराण्याहुरि(हुः+इ)ंद्रियेभ्यः परं मनः ।
मनसस्तु परा बुद्धिर्यो(द्धिः+यो) बुद्धेः परतस्तु सः ॥ ४२ ॥
एवं बुद्धेः परं बुद्ध्वा संस्तभ्यात्मानमात्मना ।
जहि शत्रुं महाबाहो कामरूपं(न्) दुरासदम् ॥ ४३ ॥

ओं तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे **कर्मयोगोनाम तृतीयोऽध्यायः** ॥ ३ ॥

---

|| ॐ श्री ||

## स्वर साधना - श्रीमद् भगवद्गीता

### चतुर्थोऽध्यायः - ज्ञानकर्मसंन्यासयोग

---

ओं श्रीकृष्णपरब्रह्मणे नमः | श्रीमद्भगवद्गीता |अथ चतुर्थोऽध्यायः || ज्ञानकर्मसंन्यासयोगः||

श्रीभगवानुवाच

इमं विवस्वते योगं प्रोक्तवानहमव्ययम् ।
विवस्वान्मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत् ॥ १ ॥

एवं परंपराप्राप्तमि(म्+इ)मं राजर्षयो विदुः ।
स कालेनेह महता योगो नष्टः परंतप ॥ २ ॥

स एवायं मया तेऽद्य योगः प्रोक्तः पुरातनः ।
भक्तोऽसि मे सखा चेति रहस्यं ह्येतदुत्तमम् ॥ ३ ॥

अर्जुन उवाच

अपरं भवतो जन्म परं(ञ्) जन्म विवस्वतः ।
कथमेतद्विजानीयां(न्) त्वमादौ प्रोक्तवानिति ॥ ४ ॥

श्रीभगवानुवाच

बहूनि मे व्यतीतानि जन्मानि तव चार्जुन ।
तान्यहं वेद सर्वाणि न त्वं वेत्थ परंतप ॥ ५ ॥

अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन् ।
प्रकृतिं स्वामधिष्ठाय संभवाम्यात्ममायया ॥ ६ ॥

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥ ७ ॥
परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय संभवामि युगे युगे ॥ ८ ॥
जन्मकर्म च मे दिव्यमे(म्+ए)वं यो वेत्ति तत्त्वतः ।
त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन ॥ ९ ॥
वीतरागभयक्रोधा मन्मया मामुपाश्रिताः ।
बहवो ज्ञानतपसा पूता मद्भावमागताः ॥ १० ॥
ये यथा मां प्रपद्यंते तांस्तथैव भजाम्यहम् ।
मम वर्त्मानुवर्तंते मनुष्याः पार्थ सर्वशः ॥ ११ ॥
कांक्षंतः कर्मणां सिद्धिं यजंत इह देवताः ।
क्षिप्रं हि मानुषे लोके सिद्धिर्भवति कर्मजा ॥ १२ ॥
चातुर्वर्ण्यं मया सृष्टं(ङ्) गुणकर्मविभागशः ।
तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययम् ॥ १३ ॥
न मां(ङ्) कर्माणि लिंपंति न मे कर्मफले स्पृहा ।
इति मां योऽभिजानाति कर्मभिर्न स बध्यते ॥ १४ ॥
एवं ज्ञात्वा कृतं(ङ्) कर्म पूर्वैरपि मुमुक्षुभिः ।
कुरु कर्मैव तस्मात्त्वं पूर्वैः पूर्वतरं(ङ्) कृतम् ॥ १५ ॥
किं(ङ्) कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः ।
तत्ते कर्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥ १६ ॥

कर्मणो ह्यपि बोद्धव्यं बोद्धव्यं(ञ्) च विकर्मणः ।
अकर्मणश्च बोद्धव्यं(ङ्) गहना कर्मणो गतिः ॥ १७ ॥
कर्मण्यकर्म यः पश्येद(त्+अ)कर्मणि च कर्म यः ।
स बुद्धिमान्मनुष्येषु स युक्तः कृत्स्नकर्मकृत् ॥ १८ ॥
यस्य सर्वे समारंभाः कामसंकल्पवर्जिताः ।
ज्ञानाग्निदग्धकर्माणं(न्) तमाहुः पंडितं बुधाः ॥ १९ ॥
त्यक्त्वा कर्मफलासंगं(न्) नित्यतृप्तो निराश्रयः ।
कर्मण्यभिप्रवृत्तोऽपि नैव किंचित्करोति सः ॥ २० ॥
निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः ।
शारीरं(ङ्) केवलं(ङ्) कर्म कुर्वन्नाप्नोति किल्बिषम् ॥ २१ ॥
यदृच्छालाभसंतुष्टो द्वंदातीतो विमत्सरः ।
समः सिद्धावसिद्धौ च कृत्वापि न निबध्यते ॥ २२ ॥
गतसंगस्य मुक्तस्य ज्ञानावस्थितचेतसः ।
यज्ञा याचरतः कर्म समग्रं प्रविलीयते ॥ २३ ॥
ब्रह्मार्पणं ब्रह्महविर्ब्र(विः+ब्र)ह्माग्नौ ब्रह्मणा हुतम् ।
ब्रह्मैव तेन गंतव्यं ब्रह्मकर्मसमाधिना ॥ २४ ॥
दैवमेवापरे यज्ञं योगिनः पर्युपासते ।
ब्रह्माग्नावपरे यज्ञं यज्ञेनैवोपजुह्वति ॥ २५ ॥
श्रोत्रादीनींद्रियाण्यन्ये संयमाग्निषु जुह्वति ।
शब्दादीन्विषयानन्य इंद्रियाग्निषु जुह्वति ॥ २६ ॥

सर्वाणींद्रियकर्माणि प्राणकर्माणि चापरे ।
आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते ॥ २७ ॥
द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे ।
स्वाध्याय ज्ञानयज्ञाश्च यतयः संशितव्रताः ॥ २८ ॥
अपाने जुह्वति प्राणं प्राणेऽपानं(न्) तथापरे ।
प्राणापानगती रुद्ध्वा प्राणायामपरायणाः ॥ २९ ॥
अपरे नियताहाराः प्राणान् प्राणेषु जुह्वति ।
सर्वेऽप्येते यज्ञविदो यज्ञक्षपितकल्मषाः ॥ ३० ॥
यज्ञशिष्टामृतभुजो यांति ब्रह्म सनातनम् ।
नायं लोकोऽस्त्ययज्ञस्य कुतोऽन्यः कुरुसत्तम ॥ ३१ ॥
एवं बहुविधा यज्ञा वितता ब्रह्मणो मुखे ।
कर्मजान्विद्धि तान् सर्वाने(न्+ए)वं ज्ञात्वा विमोक्ष्यसे ॥३२॥

श्रेयान् द्रव्यमयाद्यज्ञाज्ज्ञा(त्+ज्ञा)नयज्ञः परंतप ।
सर्वं(ङ्) कर्माखिलं पार्थ ज्ञाने परिसमाप्यते ॥ ३३ ॥
तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया ।
उपदेक्ष्यंति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः ॥ ३४ ॥
यज्ज्ञात्त्वा न पुनर्मोहमे(म्+ए)वं यास्यसि पांडव ।
येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि ॥ ३५ ॥
अपि चेदसि पापेभ्यः सर्वेभ्यः पापकृत्तमः ।
सर्वं ज्ञानप्लवेनैव वृजिनं संतरिष्यसि ॥ ३६ ॥

यथैधांसि समिद्धोग्निर्भ(ग्निः+भ)स्म सात्कुरुतेऽर्जुन ।
ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा ॥ ३७ ॥
न हि ज्ञानेन सदृशं पवित्रमिह विद्यते ।
तत्स्वयं योगसंसिद्धः कालेनात्मनि विंदति ॥ ३८ ॥
श्रद्धावांल्लभते ज्ञानं(न्) तत्परः संयतेंद्रियः ।
ज्ञानं लब्ध्वा परां शांतिम(म्+अ)चिरेणाधिगच्छति ॥ ३९ ॥
अज्ञश्चाश्रद्धधानश्च संशयात्मा विनश्यति ।
नायं लोकोऽस्ति न परो न सुखं संशयात्मनः ॥ ४० ॥
योगसंन्यस्तकर्माणं ज्ञानसंछिन्नसंशयम् ।
आत्मवंतं(न्) न कर्माणि निबध्नंति धनंजय ॥ ४१ ॥
तस्मादज्ञानसंभूतं हृत्स्थं(म्) ज्ञानासिनात्मनः ।
छित्त्वैनं संशयं योगमा(म्+आ)तिष्ठोत्तिष्ठ भारत ॥ ४२ ॥

ओं तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे **ज्ञानकर्मसंन्यासयोगोनाम चतुर्थोऽध्यायः** ॥४॥

|| ॐ श्री **//**

## स्वर साधना - श्रीमद् भगवद्गीता

### पंचमोऽध्यायः - कर्मसंन्यासयोगः

---

ओं श्रीकृष्णपरब्रह्मणे नमः | श्रीमद्भगवद्गीता |अथ पंचमोऽध्यायः||  कर्मसंन्यासयोगः ||

अर्जुन उवाच

संन्यासं(ङ्) कर्मणां(ङ्) कृष्ण पुनर्योगं(ञ्) च शंससि ।

यच्छ्रेय एतयोरेकं(न्) तन्मे ब्रूहि सुनिश्चितम् ॥ १ ॥

श्रीभगवानुवाच

संन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ ।

तयोस्तु कर्मसंन्यासात्क(त्+क)र्मयोगो विशिष्यते ॥ २ ॥

ज्ञेयः स नित्यसंन्यासी यो न द्वेष्टि न कांक्षति ।

निर्द्वंद्वो हि महाबाहो सुखं बंधात्प्रमुच्यते ॥ ३ ॥

सांख्ययोगौ पृथग्बालाः प्रवदंति न पंडिताः ।

एकमप्यास्थितः सम्यगु(क्+उ)भयोर्विंदते फलम् ॥ ४ ॥

यत्सांख्यैः प्राप्यते स्थानं(न्) तद्योगैरपि गम्यते ।

एकं सांख्यं(ञ्) च योगं(ञ्) च यः पश्यति स पश्यति ॥ ५ ॥

संन्यासस्तु महाबाहो दुःखमाप्तुमयोगतः ।

योगयुक्तो मुनिर्ब्रह्म नचिरेणाधिगच्छति ॥ ६ ॥

योगयुक्तो विशुद्धात्मा विजितात्मा जितेंद्रियः ।
सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते ॥ ७ ॥
नैव किंचित्करोमीति युक्तो मन्येत तत्त्ववित् ।
पश्यन् शृण्वन् स्पृशन् जिघ्रन् अश्नन् गच्छन् स्वपन् श्वसन् ॥ ८ ॥
प्रलपन् विसृजन् गृह्णन्नु(न्+उ)न्मिषन्नि(न्+नि)मिषन्नपि ।
इंद्रियाणींद्रियार्थेषु वर्तंत इति धारयन् ॥ ९ ॥
ब्रह्मण्याधाय कर्माणि संगं(न्) त्यक्त्वा करोति यः ।
लिप्यते न स पापेन पद्मपत्रमिवांभसा ॥ १० ॥
कायेन मनसा बुद्ध्या केवलैरिंद्रियैरपि ।
योगिनः कर्म कुर्वंति संगं(न्) त्यक्त्वात्मशुद्धये ॥ ११ ॥
युक्तः कर्मफलं(न्) त्यक्त्वा शांतिमाप्नोति नैष्ठिकीम् ।
अयुक्तः कामकारेण फले सक्तो निबध्यते ॥ १२ ॥
सर्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी ।
नवद्वारे पुरे देही नैव कुर्वन्न कारयन् ॥ १३ ॥
न कर्तृत्वं(न्) न कर्माणि लोकस्य सृजति प्रभुः ।
न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते ॥ १४ ॥
नादत्ते कस्यचित् पापं(न्) न चैव सुकृतं विभुः ।
अज्ञानेनावृतं ज्ञानं(न्) तेन मुह्यंति जंतवः ॥ १५ ॥
ज्ञानेन तु तदज्ञानं येषां(न्) नाशितमात्मनः ।
तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परम् ॥ १६ ॥
तद्बुद्धयस्तदात्मानस्त(नः+त)न्निष्ठास्तत्परायणाः ।

गच्छंत्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः ॥ १७ ॥
विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि ।
शुनि चैव श्वपाके च पंडिताः समदर्शिनः ॥ १८ ॥
इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः ।
निर्दोषं हि समं ब्रह्म तस्माद्ब्रह्मणि ते स्थिताः ॥ १९ ॥
न प्रहृष्येत्प्रियं प्राप्य नोद्विजेत् प्राप्य चाप्रियम् ।
स्थिरबुद्धिरसंमूढो ब्रह्मविद्ब्रह्मणि स्थितः ॥ २० ॥
बाह्यस्पर्शेष्वसक्तात्मा विंदत्यात्मनि यत्सुखम् ।
स ब्रह्म योगयुक्तात्मा सुखमक्षयमश्नुते ॥ २१ ॥
ये हि संस्पर्शजा भोगा दुःखयोनय एव ते ।
आद्यंतवंतः कौंतेय न तेषु रमते बुधः ॥ २२ ॥

शक्नोतीहैव यः सोढुं प्राक्शरीरविमोक्षणात् ।
कामक्रोधोद्भवं वेगं स युक्तः स सुखी नरः ॥ २३ ॥
योऽंतःसुखोऽंतरारामस्त(मः+त)थांतर्ज्योतिरेव यः ।
स योगी ब्रह्मनिर्वाणं ब्रह्मभूतोऽधिगच्छति ॥ २४ ॥
लभंते ब्रह्मनिर्वाणमृ(म्+ऋ)षयः क्षीणकल्मषाः ।
छिन्नद्वैधा यतात्मनः सर्वभूतहिते रताः ॥ २५ ॥
कामक्रोधवियुक्तानां यतीनां यतचेतसाम् ।
अभितो ब्रह्मनिर्वाणं वर्तते विदितात्मनाम् ॥ २६ ॥

स्पर्शान् कृत्वा बहिर्बाह्यांश्च(ह्यान्+च)क्षुश्चैवांतरे भ्रुवोः ।
प्राणापानौ समौ कृत्वा नासाभ्यंतरचारिणौ ॥ २७ ॥
यतेंद्रियमनोबुद्धिर्मु(द्धिः+मु)निर्मोक्षपरायणः ।
विगतेच्छाभयक्रोधो यः सदा मुक्त एव सः ॥ २८ ॥
भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम् ।
सुहृदं सर्वभूतानां ज्ञात्वा मां शांतिमृच्छति ॥ २९ ॥

ओं तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे **कर्मसंन्यासयोगोनाम पंचमोऽध्यायः** ॥

|| ॐ श्री ||

## स्वर साधना - श्रीमद् भगवद्गीता

### षष्ठोऽध्यायः - आत्मसंयमयोगः

---

ओं श्रीकृष्णपरब्रह्मणे नमः / श्रीमद्भगवद्गीता /अथ षष्ठोऽध्यायः|| आत्मसंयमयोगः||

श्रीभगवानुवाच

अनाश्रितः कर्मफलं(ङ्) कार्यं(ङ्) कर्म करोति यः ।
स संन्यासी च योगी च न निरग्निर्न चाक्रियः || १ ||

यं सन्यासमिति प्राहुर्यो(हुः+यो)गं(न्) तं विद्धि पांडव ।
न ह्यसंन्यस्त संकल्पो योगी भवति कश्चन || २ ||

आरुरुक्षोर्मुनेर्योगं(ङ्) कर्म कारणमुच्यते ।
योगारूढस्य तस्यैव शमः कारणमुच्यते || ३ ||

यदा हि नेंद्रियार्थेषु न कर्मस्वनुषज्जते ।
सर्वसंकल्पसंन्यासी योगारूढस्तदोच्यते || ४ ||

उद्धरेदात्मनात्मानं(न्) नात्मानमवसादयेत् ।
आत्मैव ह्यात्मनो बंधुरा(धुः+आ)त्मैव रिपुरात्मनः || ५ ||

बंधुरात्मात्मनस्तस्य येनात्मैवात्मना जितः ।
अनात्मनस्तु शत्रुत्वे वर्तेतात्मैव शत्रुवत् || ६ ||

जितात्मनः प्रशांतस्य परमात्मा समाहितः ।
शीतोष्णसुखदुःखेषु तथा मानापमानयोः || ७ ||

ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेंद्रियः ।

युक्त इत्युच्यते योगी समलोष्टाश्मकांचनः ॥ ८ ॥
सुहृन्मित्रार्युदासीन मध्यस्थद्वेष्यबंधुषु ।
साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते ॥ ९ ॥
योगी युंजीत सततमा(म्+आ)त्मानं रहसि स्थितः ।
एकाकी यतचित्तात्मा निराशीरपरिग्रहः ॥ १० ॥

शुचौदेशे प्रतिष्ठाप्य स्थिरमासनमात्मनः ।
नात्युच्छ्रितं(न्) नातिनीचं(ञ्) चैलाजिनकुशोत्तरम् ॥ ११ ॥
तत्रैकाग्रं मनः कृत्वा यतचित्तेंद्रियक्रियः ।
उपविश्यासने युंज्याद्यो(त्+यो)गमात्मविशुद्धये ॥ १२ ॥
समं(ङ्) कायशिरोग्रीवं(न्) धारयन्नचलं स्थिरः ।
संप्रेक्ष्य नासिकाग्रं स्वं(न्) दिशश्चानवलोकयन् ॥ १३ ॥
प्रशांतात्मा विगतभीर्ब्र(भीः+ब्र)ह्मचारिव्रते स्थितः ।
मनः संयम्य मच्चित्तो युक्त आसीत मत्परः ॥ १४ ॥
युंजन्नेवं सदात्मानं योगी नियतमानसः ।
शांतिं(न्) निर्वाणपरमां मत्संस्थामधिगच्छति ॥ १५ ॥
नात्यश्नतस्तु योगोऽस्ति न चैकांतमनश्नतः ।
न चाति स्वप्नशीलस्य जाग्रतो नैव चार्जुन ॥ १६ ॥
युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु ।
युक्तस्वप्नावबोधस्य योगो भवति दुःखहा ॥ १७ ॥
यदा विनियतं(ञ्)चित्तमा(म्+आ)त्मन्येवावतिष्ठते ।

निःस्पृहः सर्वकामेभ्यो युक्त इत्युच्यते तदा ॥ १८ ॥
यथा दीपो निवातस्थो नेंगते सोपमा स्मृता ।
योगिनो यतचित्तस्य युंजतो योगमात्मनः ॥ १९ ॥
यत्रोपरमते चित्तं(न्) निरुद्धं योगसेवया ।
यत्र चैवात्मनात्मानं पश्यन्नात्मनि तुष्यति ॥ २० ॥
सुखमात्यंतिकं यत्तद्बु(त्+बु)द्धिग्राह्यमतींद्रियम् ।
वेत्ति यत्र न चैवायं स्थितश्चलति तत्त्वतः ॥ २१ ॥
यं लब्ध्वा चापरं लाभं मन्यते नाधिकं(न्) ततः ।
यस्मिन् स्थितो न दुःखेन गुरुणापि विचाल्यते ॥ २२ ॥
तं विद्याद्दुःखसंयोगवियोगं योगसंज्ञितम् ।
स निश्चयेन योक्तव्यो योगोऽनिर्विण्णचेतसा ॥ २३ ॥

संकल्पप्रभवान् कामांस्त्य(न्+त्य)क्त्वासर्वानशेषतः ।
मनसैवेंद्रियग्रामं विनियम्य समंततः ॥ २४ ॥
शनैः शनैरुपरमेद्बु(त्+बु)द्ध्या धृतिगृहीतया ।
आत्मसंस्थं मनः कृत्वा न किंचिदपि चिंतयेत् ॥ २५ ॥
यतो यतो निश्चरति मनश्चंचलमस्थिरम् ।
ततस्ततो नियम्यैतदा(त्+आ)त्मन्येव वशं(न्) नयेत् ॥ २६ ॥

प्रशांतमनसं ह्येनं योगिनं सुखमुत्तमम् ।
उपैति शांतरजसं ब्रह्मभूतमकल्मषम् ॥ २७ ॥

युंजन्नेवं सदाऽत्मानं योगी विगतकल्मषः ।
सुखेन ब्रह्मसंस्पर्शम(म्+अ)त्यंतं सुखमश्नुते ॥ २८ ॥
सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि ।
ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः ॥ २९ ॥
यो मां पश्यति सर्वत्र सर्वं(ञ्) च मयि पश्यति ।
तस्याहं(न्) न प्रणश्यामि स च मे न प्रणश्यति ॥ ३० ॥
सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः ।
सर्वथा वर्तमानोऽपि स योगी मयि वर्तते ॥ ३१ ॥
आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन ।
सुखं वा यदि वा दुःखं स योगी परमो मतः ॥ ३२ ॥

अर्जुन उवाच
योऽयं योगस्त्वया प्रोक्तः साम्येन मधुसूदन ।
एतस्याहं(न्) न पश्यामि चंचलत्वात् स्थितिं स्थिराम् ॥ ३३ ॥
चंचलं हि मनः कृष्ण प्रमाथि बलवद्दृढम् ।
तस्याहं(न्) निग्रहं मन्ये वायोरिव सुदुष्करम् ॥ ३४ ॥
श्रीभगवानुवाच
असंशयं महाबाहो मनो दुर्निग्रहं(ञ्) चलम् ।
अभ्यासेन तु कौंतेय वैराग्येण च गृह्यते ॥ ३५ ॥
असंयतात्मना योगो दुष्प्राप इति मे मतिः ।
वश्यात्मना तु यतता शक्योऽवाप्तुमुपायतः ॥ ३६ ॥

अर्जुन उवाच

अयतिः श्रद्धयोपेतो योगाच्चलितमानसः ।
अप्राप्य योगसंसिद्धिं(ङ्) कां(ङ्) गतिं(ङ्) कृष्ण गच्छति ।।३७।।

कच्चिन्नोभयविभ्रष्टश्छि(ष्टः+छि)न्नाभ्रमिव नश्यति ।
अप्रतिष्ठो महाबाहो विमूढो ब्रह्मणः पथि ॥ ३८ ॥

एतन्मे संशयं(ङ्) कृष्ण छेत्तुमर्हस्यशेषतः ।
त्वदन्यः संशयस्यास्य छेत्ता न ह्युपपद्यते ॥ ३९ ॥

श्रीभगवानुवाच

पार्थनैवेह नामुक्त विनाशस्तस्य विद्यते ।
न हि कल्याणकृत्कश्चिद्दु(त्+दु)र्गतिं(न्) तात गच्छति ॥ ४० ॥

प्राप्य पुण्यकृतां लोकानु(न्+उ)षित्वा शाश्वतीः समाः ।
शुचीनां श्रीमतां(ङ्) गेहे योगभ्रष्टोऽभिजायते ॥ ४१ ॥

अथवा योगिनामेव कुले भवति धीमताम् ।
एतद्धि दुर्लभतरं लोके जन्म यदीदृशम् ॥ ४२ ॥

तत्र तं बुद्धिसंयोगं लभते पौर्वदेहिकम् ।
यतते च ततो भूयः संसिद्धौ कुरुनंदन ॥ ४३ ॥

पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि सः ।
जिज्ञासुरपि योगस्य शब्दब्रह्मातिवर्तते ॥ ४४ ॥

प्रयत्नाद्यतमानस्तु योगी संशुद्धकिल्बिषः ।
अनेकजन्म संसिद्धस्त(द्धः+त)तो याति परां(ङ्)गतिम् ।।४५।।

तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः ।
कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन ॥ ४६ ॥

योगिनामपि सर्वेषां मद्गतेनांतरात्मना ।
श्रद्धावान्भजते यो मां स मे युक्ततमो मतः ॥ ४७ ॥

ओं तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे **आत्मसंयमयोगोनाम षष्ठोऽध्यायः** ॥६॥

---

|| ॐ श्री ||

## स्वर साधना - श्रीमद् भगवद्गीता

### अथ सप्तमोऽध्यायः - ज्ञानविज्ञानयोगः

---

ओं श्रीकृष्णपरब्रह्मणे नमः | श्रीमद्भगवद्गीता | अथ सप्तमोऽध्यायः || ज्ञानविज्ञानयोगः||

श्रीभगवानुवाच

मय्यासक्तमनाः पार्थ योगं युंजन्मदाश्रयः ।
असंशयं समग्रं मां यथा ज्ञास्यसि तच्छृणु ॥ १ ॥

ज्ञानं(न्) तेऽहं सविज्ञानमि(म्+इ)दं वक्ष्याम्यशेषतः ।
यज्ज्ञात्वा नेह भूयोऽन्यज्ज्ञा(त्+ज्ञा)तव्यमवशिष्यते ॥ २ ॥

मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये ।
यततामपि सिद्धानां(ङ्) कश्चिन्मां वेत्ति तत्त्वतः ॥ ३ ॥

भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ।
अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥ ४ ॥

अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् ।
जीवभूतां महाबाहो ययेदं(न्) धार्यते जगत् ॥ ५ ॥

एतद्योनीनि भूतानि सर्वाणीत्युपधारय ।
अहं(ङ्) कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा ॥ ६ ॥

मत्तः परतरं(न्) नान्यत्कि(त्+कि)ंचिदस्ति धनंजय ।
मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव ॥ ७ ॥

रसोऽहमप्सु कौंतेय प्रभास्मि शशिसूर्ययोः ।
प्रणवः सर्ववेदेषु शब्दः खे पौरुषं(न्) नृप ॥ ८ ॥
पुण्यो गंधः पृथिव्यां(ज्) च तेजश्चास्मि विभावसौ ।
जीवनं सर्वभूतेषु तपश्चास्मि तपस्विषु ॥ ९ ॥
बीजं मां सर्वभूतानां विद्धि पार्थ सनातनम् ।
बुद्धिर्बुद्धिमतामस्मि तेजस्तेजस्विनामहम् ॥ १० ॥

बलं बलवतां(ञ्) चाहं(ङ्) कामरागविवर्जितम् ।
धर्माविरुद्धो भूतेषु कामोऽस्मि भरतर्षभ ॥ ११ ॥
ये चैव सात्त्विका भावा राजसास्तामसाश्चये ।
मत्त एवेति तान्विद्धि न त्वहं(न्) तेषु ते मयि ॥ १२ ॥
त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदं(ञ्) जगत् ।
मोहितं(न्) नाभिजानाति मामेभ्यः परमव्ययम् ॥ १३ ॥
दैवी ह्येषा गुणमयी मम माया दुरत्यया ।
मामेव ये प्रपद्यंते मायामेतां(न्) तरंति ते ॥ १४ ॥
न मां (न्) दुष्कृतिनो मूढाः प्रपद्यंते नराधमाः ।
माययापहृतज्ञाना आसुरं भावमाश्रिताः ॥ १५ ॥
चतुर्विधा भजंते मां(ञ्) जनाः सुकृतिनोऽर्जुन ।
आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ॥ १६ ॥
तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते ।
प्रियो हि ज्ञानिनोऽत्यर्थम(म्+अ)हं स  च मम प्रियः ॥ १७ ॥

उदाराः सर्व एवैते ज्ञानी त्वात्मैव मे मतम् ।
आस्थितः स हि युक्तात्मा मामेवानुत्तमां(ङ्) गतिम् ॥ १८ ॥
बहूनां(ञ्) जन्मनामंते ज्ञानवान्मां प्रपद्यते ।
वासुदेवः सर्वमिति स महात्मा सुदुर्लभः ॥ १९ ॥
कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यंतेऽन्यदेवताः ।
तं(न्) तं(न्) नियममास्थाय प्रकृत्या नियताः स्वया ॥ २० ॥
यो यो यां यां(न्) तनुं भक्तः श्रद्धयार्चितुमिच्छति ।
तस्य तस्याचलां श्रद्धां(न्) तामेव विदधाम्यहम् ॥ २१ ॥
स तया श्रद्धया युक्तस्त(क्तः+त)स्याराधनमीहते ।
लभते च ततः कामान् मयैव विहितान् हि तान् ॥ २२ ॥
अंतवत्तु फलं(न्) तेषां(न्) तद्भवत्यल्पमेधसाम् ।
देवान्देवयजो यांति मद्भक्ता यांति मामपि ॥ २३ ॥
अव्यक्तं व्यक्तिमापन्नं मन्यंते मामबुद्धयः ।
परं भावमजानंतो ममाव्ययमनुत्तमम् ॥ २४ ॥
नाहं प्रकाशः सर्वस्य योगमायासमावृतः ।
मूढोऽयं(न्) नाभिजानाति लोको मामजमव्ययम् ॥ २५ ॥
वेदाहं समतीतानि वर्तमानानि चार्जुन ।
भविष्याणि च भूतानि मां(न्) तु वेद न कश्चन ॥ २६ ॥
इच्छाद्वेषसमुत्थेन द्वंद्वमोहेन भारत ।
सर्वभूतानि संमोहं सर्गे यांति परंतप ॥ २७ ॥

येषां (न्) त्वंतगतं पापं(ञ्) जनानां पुण्यकर्मणाम् ।
ते द्वंद्वमोहनिर्मुक्ता भजंते मां(न्) दृढव्रताः ॥ २८ ॥

जरामरण मोक्षाय मामाश्रित्य यतंति ये ।
ते ब्रह्म तद्विदुः कृत्स्नम(म्+अ)ध्यात्मं(ङ्) कर्म चाखिलम् ॥२९॥

साधिभूताधिदैवं मां साधियज्ञं(ञ्) च ये विदुः ।
प्रयाणकालेऽपि च मां(न्) ते विदुर्युक्तचेतसः ॥ ३० ॥

ओं तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे **ज्ञानविज्ञानयोगोनाम सप्तमोऽध्यायः** ॥ ७ ॥

---

|| ॐ श्री ||

## स्वर साधना - श्रीमद् भगवद्गीता

### अष्टमोऽध्यायः - अक्षरब्रह्मयोगः

---

ओं श्रीकृष्णपरब्रह्मणे नमः | श्रीमद्भगवद्गीता |अथ अष्टमोऽध्यायः|| अक्षरब्रह्मयोगः ||

अर्जुन उवाच

किं(न्) तद्ब्रह्म किमध्यात्मं(ङ्) किं(ङ्) कर्म पुरुषोत्तम ।
अधिभूतं(ञ्) च किं प्रोक्तम(म्+अ)धिदैवं(ङ्) किमुच्यते || १ ||
अधियज्ञः कथं(ङ्) कोऽत्र देहेऽस्मिन् मधुसूदन ।
प्रयाणकाले च कथं ज्ञेयोऽसि नियतात्मभिः || २ ||

श्रीभगवानुवाच

अक्षरं ब्रह्म परमं स्वभावोऽध्यात्ममुच्यते ।
भूतभावोद्भवकरो विसर्गः कर्मसंज्ञितः || ३ ||
अधिभूतं क्षरो भावः पुरुषश्चाधिदैवतम् ।
अधियज्ञोऽहमेवात्र देहे देहभृतां वर || ४ ||
अंतकाले च मामेव स्मरन् मुक्त्वा कलेवरम् ।
यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः || ५ ||
यं यं वापि स्मरन्भावं(न्) त्यजत्यंते कलेवरम् ।
तं(न्) तमेवैति कौंतेय सदा तद्भावभावितः || ६ ||
तस्मात्सर्वेषु कालेषु मामनुस्मर युध्य च ।
मय्यर्पितमनोबुद्धिर्मा(द्धिः+मा)मेवैष्यस्यसंशयम् || ७ ||

अभ्यासयोगयुक्तेन चेतसा नान्यगामिना ।
परमं पुरुषं(न्) दिव्यं याति पार्थानुचिंतयन् ॥ ८ ॥
कविं पुराणमनुशासितारम(म्+अ)णोरणीयांसमनुस्मरेद्यः ।
सर्वस्य धातारमचिंत्यरूपमा(म्+आ)दित्यवर्णं(न्) तमसः परस्तात् ॥९॥

प्रयाणकाले मनसाचलेन भक्त्यायुक्तो योगबलेन चैव भ्रुवोर्मध्ये
प्राणमावेश्य सम्यक् स तं परं पुरुषमुपैति दिव्यम् ॥१०॥

यदक्षरं वेदविदो वदंति विशंति यद्यतयो वीतरागाः ।
यदिच्छंतो ब्रह्मचर्यं(ञ्) चरंति तत्ते पदं संग्रहेण प्रवक्ष्ये ॥ ११ ॥
सर्वद्वाराणि संयम्य मनो हृदि निरुध्य च ।
मूर्ध्न्याधायात्मनः प्राणमा(म्+आ)स्थितो योगधारणाम् ॥ १२॥

ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन् ।
यः प्रयाति त्यजन्देहं स याति परमां(ङ्) गतिम् ॥ १३ ॥
अनन्यचेताः सततं यो मां स्मरति नित्यशः ।
तस्याहं सुलभः पार्थ नित्ययुक्तस्य योगिनः ॥ १४ ॥
मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम् ।
नाप्नुवंति महात्मानः संसिद्धिं परमां(ङ्) गताः ॥ १५ ॥

आब्रह्म भुवनाल्लोकाः पुनरावर्तिनोऽर्जुन ।
मामुपेत्य तु कौंतेय पुनर्जन्म न विद्यते ॥ १६ ॥
सहस्त्रयुगपर्यंतम(म्+अ)हर्यद्ब्रह्मणो विदुः ।
रात्रिं युगसहस्त्रांतां(न्) तेऽहोरात्रविदो जनाः ॥ १७ ॥
अव्यक्ताद्व्यक्तयः सर्वाः प्रभवंत्यहरागमे ।
रात्र्यागमे प्रलीयंते तत्रैवाव्यक्तसंज्ञके ॥ १८ ॥
भूतग्रामः स एवायं भूत्वा भूत्वा प्रलीयते ।
रात्र्यागमेऽवशः पार्थ प्रभवत्यहरागमे ॥ १९ ॥
परस्तस्मात्तु भावोऽन्योऽ(न्यः+अ)व्यक्तोऽव्यक्तात् सनातनः ।
यः स सर्वेषु भूतेषु नश्यत्सु न विनश्यति ॥ २० ॥
अव्यक्तोऽक्षर इत्युक्तस्त(क्तः+त)माहुः परमां(ङ्) गतिम् ।
यं प्राप्य न निवर्तंते तद्धाम परमं मम ॥ २१ ॥
पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया ।
यस्यांतःस्थानि भूतानि येन सर्वमिदं(न्) ततम् ॥ २२ ॥

यत्र काले त्वनावृत्तिमा(म्+आ)वृत्तिं(ञ्) चैव योगिनः ।
प्रयाता यांति तं(ङ्) कालं वक्ष्यामि भरतर्षभ ॥ २३ ॥
अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम् ।
तत्र प्रयाता गच्छंति ब्रह्म ब्रह्मविदो जनाः ॥ २४ ॥

धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम् ।
तत्र चांद्रमसं(ञ्) ज्योतिर्यो(तिः+यो)गी प्राप्य निवर्तते ॥ २५ ॥
शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते ।
एकया यात्यनावृत्तिम(म्+अ)न्ययावर्तते पुनः ॥ २६ ॥
नैते सृती पार्थ जानन्यो(न्+यो)गी मुह्यति कश्चन ।
तस्मात्सर्वेषु कालेषु योगयुक्तो भवार्जुन ॥ २७ ॥

वेदेषु यज्ञेषु तपःसु चैव दानेषु यत्पुण्यफलं प्रदिष्टम् ।
अत्येति तत्सर्वमिदं विदित्वा योगी परं स्थानमुपैति चाद्यम् ॥
२८॥

ओं तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे **अक्षरब्रह्मयोगोनाम अष्टमोऽध्यायः** ॥ ८ ॥

---

|| ॐ श्री ||

## स्वर साधना - श्रीमद् भगवद्गीता

### नवमोऽध्यायः - राजविद्याराजगुह्ययोगः

---

ओं श्रीकृष्णपरब्रह्मणे नमः | श्रीमद्भगवद्गीता |अथ नवमोऽध्यायः|| राजविद्याराजगुह्ययोगः ||

श्रीभगवानुवाच

इदं(न्) तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे ।
ज्ञानं विज्ञानसहितं यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥ १ ॥

राजविद्या राजगुह्यं पवित्रमिदमुत्तमम् ।
प्रत्यक्षावगमं(न्) धर्म्यं सुसुखं(ङ्) कर्तुमव्ययम् ॥ २ ॥

अश्रद्दधानाः पुरुषा धर्मस्यास्य परंतप ।
अप्राप्य मां(न्) निवर्तंते मृत्युसंसारवर्त्मनि ॥ ३ ॥

मया ततमिदं सर्वं(ञ्) जगदव्यक्तमूर्तिना ।
मत्स्थानि सर्वभूतानि न चाहं(न्) तेष्ववस्थितः ॥ ४ ॥

न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम् ।
भूतभृन्न च भूतस्थो ममात्मा भूतभावनः ॥ ५ ॥

यथाकाशस्थितो नित्यं वायुः सर्वत्रगो महान् ।
तथा सर्वाणि भूतानि मत्स्थानीत्युपधारय ॥ ६ ॥

सर्वभूतानि कौंतेय प्रकृतिं यांति मामिकाम् ।
कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम् ॥ ७ ॥

प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः ।
भूतग्राममिमं(ङ्) कृत्स्नम(म्+अ)वशं प्रकृतेर्वशात् ॥ ८ ॥

न च मां(न्) तानि कर्माणि निबध्नंति धनंजय ।
उदासीनवदासीनम(म्+अ)सक्तं(न्) तेषु कर्मसु ॥ ९ ॥
मयाध्यक्षेण प्रकृतिः सूयते सचराचरम् ।
हेतुनानेन कौंतेय जगद्विपरिवर्तते ॥ १० ॥

अवजानंति मां मूढा मानुषीं(न्) तनुमाश्रितम् ।
परं भावमजानंतो मम भूतमहेश्वरम् ॥ ११ ॥
मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः ।
राक्षसीमासुरीं(ञ्) चैव प्रकृतिं मोहिनीं श्रिताः ॥ १२ ॥
महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः ।
भजंत्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम् ॥ १३ ॥
सततं कीर्तयंतो मां यतंतश्च दृढव्रताः ।
नमस्यंतश्च मां भक्त्या नित्ययुक्ता उपासते ॥ १४ ॥
ज्ञानयज्ञेन चाप्यन्ये यजंतो मामुपासते ।
एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखम् ॥ १५ ॥
अहं(ङ्) क्रतुरहं यज्ञः स्वधाहमहमौषधम् ।
मंत्रोऽहमहमेवाज्यम(म्+अ)हमग्निरहं हुतम् ॥ १६ ॥
पिताहमस्य जगतो माता धाता पितामहः ।
वेद्यं पवित्रमोंकार ऋक्साम यजुरेव च ॥ १७ ॥
गतिर्भर्ता प्रभुः साक्षी निवासः शरणं सुहृत् ।
प्रभवः प्रलयः स्थानं(न्) निधानं बीजमव्ययम् ॥ १८ ॥

तपाम्यहमहं वर्षं(न्) निगृह्णाम्युत्सृजामि च ।
अमृतं(ञ्) चैव मृत्युश्च सदसच्चाहमर्जुन ॥ १९ ॥
त्रैविद्या मां सोमपाः पूतपापा यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयंते ।
ते पुण्यमासाद्य सुरेंद्रलोकम(म्+अ)श्नंति दिव्यान् दिवि देवभोगान् ॥ २० ॥
ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशंति ।
एवं(न्) त्रयीधर्ममनुप्रपन्ना गतागतं(ङ्) कामकामा लभंते ॥ २१ ॥
अनन्याश्चिंतयंतो मां ये जनाः पर्युपासते ।
तेषां(न्) नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥ २२ ॥
येऽप्यन्यदेवता भक्ता यजंते श्रद्धयान्विताः ।
तेऽपि मामेव कौंतेय यजंत्यविधिपूर्वकम् ॥ २३ ॥
अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च ।
न तु मामभिजानंति तत्त्वेनातश्च्यवंति ते ॥ २४ ॥
यांति देवव्रता देवान् पितॄन्यांति पितृव्रताः ।
भूतानि यांति भूतेज्या यांति मद्याजिनोऽपि माम् ॥ २५ ॥
पत्रं पुष्पं फलं(न्) तोयं यो मे भक्त्या प्रयच्छति ।
तदहं भक्त्युपहृतम(म्+अ)श्नामि प्रयतात्मनः ॥ २६ ॥
यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
यत्तपस्यसि कौंतेय तत्कुरुष्व मदर्पणम् ॥ २७ ॥

शुभाशुभफलैरेवं मोक्ष्यसे कर्मबंधनैः ।
संन्यासयोगयुक्तात्मा विमुक्तो मामुपैष्यसि ॥ २८ ॥
समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः ।
ये भजंति तु मां भक्त्या मयि ते तेषु चाप्यहम् ॥ २९ ॥
अपि चेत्सुदुराचारो भजते मामनन्यभाक् ।
साधुरेव स मंतव्यः सम्यग्व्यवसितो हि सः ॥ ३० ॥
क्षिप्रं भवति धर्मात्मा शश्वच्छांतिं(न्) निगच्छति ।
कौंतेय प्रति जानीहि न मे भक्तः प्रणश्यति ॥ ३१ ॥

मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः ।
स्त्रियो वैश्यास्तथा शूद्रास्तेऽ(द्राः+तेऽ)पि यांति परां(ङ्) गतिम्
॥ ३२ ॥

किं पुनर्ब्राह्मणाः पुण्याः भक्ता राजर्षयस्तथा ।
अनित्यमसुखं लोकमि(म्+इ)मं प्राप्य भजस्व माम् ॥ ३३ ॥
मन्मना भव मद्भक्तो मद्याजी मां(न्) नमस्कुरु ।
मामेवैष्यसि युक्त्वैवमा(म्+आ)त्मानं मत्परायणः ॥ ३४ ॥

ओं तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे **राजविद्याराजगुह्ययोगोनाम नवमोऽध्यायः** ॥९॥

---

|| ॐ श्री ||

# स्वर साधना - श्रीमद् भगवद्गीता

## दशमोऽध्याय - विभूतियोगः

**ओं श्रीकृष्णपरब्रह्मणे नमः / श्रीमद्भगवद्गीता /अथ दशमोऽध्याय || विभूतियोगः ||**

श्रीभगवानुवाच

भूय एव महाबाहो श्रृणु मे परमं वचः ।
यत्तेऽहं प्रीयमाणाय वक्ष्यामि हितकाम्यया || १ ||

न मे विदुः सुरगणाः प्रभवं(न्) न महर्षयः ।
अहमादिर्हि देवानां महर्षीणां(ञ्) च सर्वशः || २ ||

यो मामजमनादिं(ञ्) च वेत्ति लोकमहेश्वरम् ।
असंमूढः स मर्त्येषु सर्वपापैः प्रमुच्यते || ३ ||

बुद्धिर्ज्ञानमसंमोहः क्षमा सत्यं(न्) दमः शमः ।
सुखं(न्) दुःखं भवोऽभावो भयं(ञ्) चाभयमेव च || ४ ||

अहिंसा समता तुष्टिस्त(ष्टिः+त)पो दानं यशोऽयशः ।
भवंति भावा भूतानां मत्त एव पृथग्विधाः || ५ ||

महर्षयः सप्त पूर्वे चत्वारो मनवस्तथा ।
मद्भावा मानसा जाता येषां लोक इमाः प्रजाः || ६ ||

एतां विभूतिं योगं(ञ्) च मम यो वेत्ति तत्त्वतः ।
सोऽविकंपेन योगेन युज्यते नात्र संशयः || ७ ||

अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते ।
इति मत्वा भजंते मां बुधा भावसमन्विताः || ८ ||

मच्चित्ता मद्गतप्राणा बोधयंतः परस्परम् ।
कथयंतश्च मां(न्) नित्यं(न्) तुष्यंति च रमंति च ॥ ९ ॥
तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् ।
ददामि बुद्धियोगं(न्) तं येन मामुपयांति ते ॥ १० ॥

तेषामेवानुकंपार्थम(म्+अ)हमज्ञानजं(न्) तमः ।
नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ॥ ११ ॥

अर्जुन उवाच
परं ब्रह्म परं(न्) धाम पवित्रं परमं भवान् ।
पुरुषं शाश्वतं(न्) दिव्यमा(म्+आ)दिदेवमजं विभुम् ॥ १२ ॥
आहुस्त्वामृषयः सर्वे देवर्षीर्नारदस्तथा ।
असितो देवलो व्यासः स्वयं(ञ्) चैव ब्रवीषि मे ॥ १३ ॥
सर्वमेतदृतं मन्ये यन्मां वदसि केशव ।
न हि ते भगवन्व्यक्तिं विदुर्देवा न दानवाः ॥ १४ ॥
स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तम ।
भूतभावन भूतेश देव देव जगत्पते ॥ १५ ॥
वक्तुमर्हस्यशेषेण दिव्या ह्यात्मविभूतयः ।
याभिर्विभूतिभिर्लोकानि(न्+इ)मांस्त्वं व्याप्य तिष्ठसि ॥ १६ ॥
कथं विद्यामहं योगिंस्त्वां(गिन्+त्वां) सदा परिचिंतयन् ।
केषु केषु च भावेषु चिंत्योऽसि भगवन्मया ॥ १७ ॥

विस्तरेणात्मनो योगं विभूतिं(ञ्) च जनार्दन ।
भूयः कथय तृप्तिर्हि शृण्वतो नास्ति मेऽमृतम् ॥ १८ ॥

श्रीभगवानुवाच
हंत ते कथयिष्यामि दिव्या ह्यात्मविभूतयः ।
प्राधान्यतः कुरुश्रेष्ठ नास्त्यंतो विस्तरस्य मे ॥ १९ ॥
अहमात्मा गुडाकेश सर्वभूताशयस्थितः ।
अहमादिश्च मध्यं(ञ्) च  भूतानामंत एव च ॥ २० ॥
आदित्यानामहं विष्णुर्ज्यो(ष्णुः+ज्यो)तिषां रविरंशुमान् ।
मरीचिर्मरुतामस्मि नक्षत्राणामहं शशी ॥ २१ ॥

वेदानां सामवेदोऽस्मि देवानामस्मि वासवः ।
इंद्रियाणां मनश्चास्मि भूतानामस्मि चेतना ॥ २२ ॥
रुद्राणां शंकरश्चास्मि वित्तेशो यक्षरक्षसाम् ।
वसूनां पावकश्चास्मि मेरुः शिखरिणामहम् ॥ २३ ॥
पुरोधसां(ञ्) च मुख्यं मां विद्धि पार्थ बृहस्पतिम् ।
सेनानीनामहं स्कंदः सरसामस्मि सागरः ॥ २४ ॥
महर्षीणां भृगुरहं(ङ्) गिरामस्म्येकमक्षरम् ।
यज्ञानां(ञ्) जपयज्ञोऽस्मि स्थावराणां हिमालयः ॥ २५ ॥

अश्वत्थः सर्ववृक्षाणां(न्) देवर्षीणां(ञ्) च नारदः ।
गंधर्वाणां(ञ्) चित्ररथः सिद्धानां(ङ्) कपिलो मुनिः ॥ २६ ॥
उच्चैःश्रवसमश्वानां विद्धि माममृतोद्भवम् ।
ऐरावतं(ङ्) गजेंद्राणां(न्) नराणां(ञ्) च नराधिपम् ॥ २७ ॥
आयुधानामहं वज्रं(न्) धेनूनामस्मि कामधुक् ।
प्रजनश्चास्मि कंदर्पः सर्पाणामस्मि वासुकिः ॥ २८ ॥
अनंतश्चास्मि नागानां वरुणो यादसामहम् ।
पितॄणामर्यमा चास्मि यमः संयमतामहम् ॥ २९ ॥
प्रह्लादश्चास्मि दैत्यानां(ङ्) कालः कलयतामहम् ।
मृगाणां(ञ्) च मृगेंद्रोऽहं वैनतेयश्च पक्षिणाम् ॥ ३० ॥
पवनः पवतामस्मि रामः शस्त्रभृतामहम् ।
झषाणां मकरश्चास्मि स्रोतसामस्मि जाह्नवी ॥ ३१ ॥
सर्गाणामादिरंतश्च मध्यं (ञ्) चैवाहमर्जुन ।
अध्यात्मविद्या विद्यानां वादः प्रवदतामहम् ॥ ३२ ॥
अक्षराणामकारोऽस्मि द्वंद्वः सामासिकस्य च ।
अहमेवाक्षयः कालो धाताहं विश्वतोमुखः ॥ ३३ ॥
मृत्युः सर्वहरश्चाहमु(म्+उ)द्भवश्च भविष्यताम् ।
कीर्तिः श्रीर्वाक् च नारीणां स्मृतिर्मेधा धृतिः क्षमा ॥ ३४ ॥

बृहत्साम तथा साम्नां(ङ्) गायत्री छंदसामहम् ।
मासानां मार्गशीर्षोऽहमृ(म्+ऋ)तूनां(ङ्) कुसुमाकरः ॥ ३५ ॥

द्यूतं(ञ्) छलयतामस्मि तेजस्तेजस्विनामहम् ।
जयोऽस्मि व्यवसायोऽस्मि सत्त्वं सत्त्ववतामहम् ॥ ३६ ॥
वृष्णीनां वासुदेवोऽस्मि पांडवानां(न्) धनंजयः ।
मुनीनामप्यहं व्यासः कवीनामुशना कविः ॥ ३७ ॥
दंडो दमयतामस्मि नीतिरस्मि जिगीषताम् ।
मौनं(ञ्) चैवास्मि गुह्यानां ज्ञानं ज्ञानवतामहम् ॥ ३८ ॥
यच्चापि सर्वभूतानां बीजं(न्) तदहमर्जुन ।
न तदस्ति विना यत्स्यान्म(त्+म)या भूतं(ञ्) चराचरम् ॥ ३९ ॥
नांतोऽस्ति मम दिव्यानां विभूतीनां परंतप ।
एष तूद्देशतः प्रोक्तो विभूतेर्विस्तरो मया ॥ ४० ॥
यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा ।
तत्तदेवावगच्छ त्वं मम तेजोऽंशसंभवम् ॥ ४१ ॥
अथवा बहुनैतेन किं ज्ञातेन तवार्जुन ।
विष्टभ्याहमिदं(ङ्) कृत्स्नमे(म्+ए)कांशेन स्थितो जगत् ॥ ४२ ॥

ओं तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे **विभूतियोगोनाम दशमोऽध्यायः** ॥ १० ॥

---

|| ॐ श्री ||

## स्वर साधना - श्रीमद् भगवद्गीता

### अथएकादशोऽध्यायः - विश्वरूपदर्शनयोगः

---



अर्जुन उवाच

मदनुग्रहाय परमं(ङ्) गुह्यमध्यात्मसंज्ञितम् ।
यत्त्वयोक्तं वचस्तेन मोहोऽयं विगतो मम || १ ||

भवाप्ययौ हि भूतानां श्रुतौ विस्तरशो मया ।
त्वत्तः कमलपत्राक्ष माहात्म्यमपिचाव्ययम् || २ ||

एवमेतद्यथात्थ त्वमा(म्+आ)त्मानं परमेश्वर ।
द्रष्टुमिच्छामि ते रूपमै(म्+ऐ)श्वरं पुरुषोत्तम || ३ ||

मन्यसे यदि तच्छक्यं मया द्रष्टुमिति प्रभो ।
योगेश्वर ततो मे त्वं(न्) दर्शयात्मानमव्ययम् || ४ ||

श्रीभगवानुवाच

पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रशः ।
नानाविधानि दिव्यानि नानावर्णाकृतीनि च || ५ ||

पश्यादित्यान्वसून् रुद्रान(न्+अ)श्विनौ मरुतस्तथा ।
बहून्यदृष्टपूर्वाणि पश्याश्चर्याणि भारत || ६ ||

इहैकस्थं(ञ्) जगत्कृत्स्नं पश्याद्य सचराचरम् ।
मम देहे गुडाकेश यच्चान्यद्द्रष्टुमिच्छसि || ७ ||

न तु मां शक्यसे द्रष्टुम(म्+अ)नेनैव स्वचक्षुषा ।
दिव्यं(न्) ददामि ते चक्षुः पश्यमे योगमैश्वरम् ॥ ८ ॥

संजय उवाच

एवमुक्त्वा ततो राजन्म(न्+म)हायोगेश्वरो हरिः ।
दर्शयामास पार्थाय परमं रूपमैश्वरम् ॥ ९ ॥

अनेकवक्त्रनयनम(म्+अ)नेकाद्भुतदर्शनम् ।
अनेकदिव्याभरणं दिव्यानेकोद्यतायुधम् ॥ १० ॥

दिव्यमाल्यांबरधरं(न्) दिव्यगंधानुलेपनम् ।
सर्वाश्चर्यमयं(न्) देवम(म्+अ)नंतं विश्वतोमुखम् ॥ ११ ॥

दिवि सूर्यसहस्रस्य भवेद्युगपदुत्थिता ।
यदि भाः सदृशी सा स्याद्भा(त्+भा)सस्तस्य महात्मनः ॥
१२॥

तत्रैकस्थं(ञ्) जगत्कृत्स्नं प्रविभक्तमनेकधा ।
अपश्यद्देवदेवस्य शरीरे पांडवस्तदा ॥ १३ ॥

ततः स विस्मयाविष्टो हृष्टरोमा धनंजयः ।
प्रणम्य शिरसा देवं(ङ्) कृतांजलिरभाषत ॥ १४ ॥

अर्जुन उवाच

पश्यामि देवांस्तव देव देहे सर्वांस्तथा भूतविशेषसंघान् ।
ब्रह्माणमीशं(ङ्) कमलासनस्थमृ(स्थं+ऋ)षींश्च सर्वानुरगांश्च दिव्यान् ॥१५॥

अनेकबाहूदरवक्त्रनेत्रं पश्यामि त्वां सर्वतोऽनंतरूपम् ।
नांतं(न्) न मध्यं(न्) न पुनस्तवादिं पश्यामि विश्वेश्वर विश्वरूप ॥१६॥

किरीटिनं (ङ्) गदिनं(ञ्) चक्रिणं(ञ्) च तेजोराशिं सर्वतो दीप्तिमंतम् ।
पश्यामि त्वां दुर्निरीक्ष्यं समंताद्दी (त्+दी)प्तानलार्कद्युतिमप्रमेयम् ॥१७॥

त्वमक्षरं परमं वेदितव्यं (न्) त्वमस्य विश्वस्य परं (न्) निधानम्।
त्वमव्ययः शाश्वतधर्मगोप्ता सनातनस्त्वं पुरुषो मतो मे ॥ १८ ॥

अनादिमध्यांतमनंतवीर्यम (म्+अ) नंतबाहुं शशिसूर्यनेत्रम् ।
पश्यामि त्वां दीप्तहुताशवक्त्रं स्वतेजसा विश्वमिदं (न्) तपंतम् ॥ १९॥

वापृथिव्योरिदमंतरं हि व्याप्तं (न्) त्वयैकेन दिशश्च सर्वाः ।
दृष्ट्वाद्भुतं रूपमुग्रं(न्) तवेदं लोकत्रयं प्रव्यथितं महात्मन् ॥ २० ॥

अमी हि त्वां सुरसंघा विशंति केचिद्भीताः प्रांजलयो गृणंति ।
स्वस्तीत्युक्त्वा महर्षिसिद्धसंघाः स्तुवंति त्वां स्तुतिभिः पुष्कलाभिः॥२१॥

रुद्रादित्या वसवो ये च साध्या विश्वेऽश्विनौ मरुतश्चोष्मपाश्च ।
गंधर्वयक्षासुर सिद्धसंघाः वीक्षंते त्वां विस्मिताश्चैव सर्वे ॥ २२ ॥

रूपं महत्ते बहुवक्त्रनेत्रं महाबाहो बहुबाहूरुपादम् ।
बहूदरं बहुदंष्ट्राकरालं(न्) दृष्ट्वा लोकाः प्रव्यथितास्तथाहम् ॥ २३॥

नभःस्पृशं(न्) दीप्तमनेकवर्णं व्यात्ताननं(न्) दीप्तविशालनेत्रम् ।
दृष्ट्वाहि त्वां प्रव्यथितांतरात्मा धृतिं(न्) न विंदामि शमं(ञ्) च विष्णो ॥२४॥

दंष्ट्राकरालानि च ते मुखानि दृष्ट्वैव कालानलसन्निभानि ।
दिशो न जाने न लभे च शर्म प्रसीद देवेश जगन्निवास ॥ २५ ॥

अमी च त्वां(न्) धृतराष्ट्रस्य पुत्राः सर्वे सहैवावनिपालसंघैः ।
भीष्मो द्रोणः सूतपुत्रस्तथासौ सहास्मदीयैरपि योधमुख्यैः ॥ २६ ॥

वक्त्राणि ते त्वरमाणा विशंति दंष्ट्राकरालानि भयानकानि ।
केचिद्विलग्ना दशनांतरेषु संदृश्यंते चूर्णितैरुत्तमांगैः ॥ २७ ॥

यथा नदीनां बहवोंऽबुवेगाः समुद्रमेवाभिमुखा द्रवंति ।
तथा तवामी नरलोकवीरा विशंति वक्त्राण्यभिविज्वलंति ॥ २८ ॥

यथा प्रदीप्तं(ञ्) ज्वलनं पतंगा विशंति नाशाय समृद्धवेगाः ।
तथैव नाशाय विशंति लोकास्त(काः+त)वापि वक्त्राणि समृद्धवेगाः ॥ २९ ॥

लेलिह्यसे ग्रसमानः समंताल्लो(त्+लो)कान् समग्रान्वदनैर्ज्वलद्भिः ।
तेजोभिरापूर्य जगत्समग्रं भासस्तवोग्राः प्रतपंति विष्णो ॥ ३० ॥

आख्याहि मे को भवानुग्ररूपो नमोऽस्तु ते देव वरप्रसीद ।
विज्ञातुमिच्छामि भवंतमाद्यं(न्) न हि प्रजानामि तव प्रवृत्तिम् ॥ ३१ ॥

श्रीभगवानुवाच

कालोऽस्मि लोकक्षय कृत्प्रवृद्धो लोकान्समाहर्तुमिह प्रवृत्तः ।
ऋतेऽपि त्वां(न्) न भविष्यंति सर्वे येऽवस्थिताः प्रत्यनीकेषु योधाः ॥ ३२ ॥

तस्मात् त्वमुत्तिष्ठ यशो लभस्व जित्वा शत्रून् भुंक्ष्व राज्यं समृद्धम् ।
मयैवैते निहताः पूर्वमेव निमित्तमात्रं भव सव्यसाचिन् ॥ ३३ ॥

द्रोणं(ञ्)च भीष्मं(ञ्)च जयद्रथं(ञ्)च कर्णं(न्)तथान्यानपि योधवीरान्।
मया हतांस्त्वं(ञ्)जहि मा व्यतिष्ठा युध्यस्व जेतासि रणे सपत्नान् ॥ ३४ ॥

संजय उवाच

एतच्छ्रुत्वा वचनं(ङ्) केशवस्य कृतांजलिर्वेपमानः किरीटी ।
नमस्कृत्वा भूय एवाह कृष्णं सगद्गदं भीतभीतः प्रणम्य ॥ ३५ ॥

अर्जुन उवाच

स्थाने हृषीकेश तव प्रकीर्त्या जगत्प्रहृष्यत्यनुरज्यते च ।
रक्षांसि भीतानि दिशो द्रवंति सर्वे नमस्यंति च सिद्धसंघाः ॥ ३६ ॥

कस्माच्च ते न नमेरन् महात्मन् गरीयसे ब्रह्मणोऽप्यादिकर्त्रे ।
अनंत देवेश जगन्निवास त्वमक्षरं सदसत्तत्परं यत् ॥ ३७ ॥

त्वमादिदेवः पुरुषः पुराणस्त्व(णः+त्व)मस्य विश्वस्य परं(न्) निधानम् ।
वेत्तासि वेद्यं(ञ्) च परं(ञ्) च धाम त्वया ततं विश्वमनंतरूप ॥ ३८ ॥

वायुर्यमोऽग्निर्वरुणः शशांकः प्रजापतिस्त्वं प्रपितामहश्च ।
नमो नमस्तेऽस्तु सहस्रकृत्वः पुनश्च भूयोऽपि नमो नमस्ते ॥ ३९ ॥
नमः पुरस्तादथ पृष्ठतस्ते नमोऽस्तु ते सर्वत एव सर्व ।
अनंतवीर्यामित विक्रमस्त्वं सर्वं समाप्नोषि ततोऽसि सर्वः ॥ ४० ॥
सखेति मत्वा प्रसभं यदुक्तं हे कृष्ण हे यादव हे सखेति ।
अजानता महिमानं(न्) तवेदं मया प्रमादात्प्रणयेन वापि ॥ ४१ ॥
यच्चावहासार्थमसत्कृतोऽसि विहारशय्यासनभोजनेषु ।
एकोऽथवाप्यच्युततत्समक्षं तत्क्षामये त्वामहमप्रमेयम् ॥ ४२ ॥

पितासि लोकस्य चराचरस्य त्वमस्य पूज्यश्च गुरुर्गरीयान् ।
न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यो लोकत्रयेऽप्यप्रतिमप्रभाव ॥ ४३ ॥

तस्मात् प्रणम्य प्रणिधाय कायं प्रसादये त्वामहमीशमीड्यम् ।
पितेव पुत्रस्य सखेव सख्युः प्रियः प्रियायार्हसि देव सोढुम् ॥ ४४ ॥

अदृष्टपूर्वं हृषितोऽस्मि दृष्ट्वा भयेन च प्रव्यथितं मनो मे ।
तदेव मे दर्शय देवरूपं प्रसीद देवेश जगन्निवास ॥ ४५ ॥

किरीटिनं(ङ्) गदिनं(ञ्) चक्रहस्तमि(म्+इ)च्छामि त्वां(न्) द्रष्टुमहं(न्) तथैव ।
तेनैव रूपेण चतुर्भुजेन सहस्रबाहो भव विश्वमूर्ते ॥ ४६ ॥

श्रीभगवानुवाच
मया प्रसन्नेन तवार्जुनेदं रूपं परं(न्) दर्शितमात्मयोगात् ।
तेजोमयं विश्वमनंतमाद्यं यन्मे त्वदन्येन न दृष्टपूर्वम् ॥ ४७ ॥
न वेदयज्ञाध्ययनैर्न दानैर्न(नैः+न) च क्रियाभिर्न तपोभिरुग्रैः ।
एवं रूपः शक्य अहं(न्) नृलोके द्रष्टुं(न्) त्वदन्येन कुरुप्रवीर ॥ ४८ ॥

मा ते व्यथा मा च विमूढभावो दृष्ट्वा रूपं(ङ्) घोरमीदृङ्ममेदम् ।
व्यपेतभीः प्रीतमनाः पुनस्त्वं(न्) तदेव मे रूपमिदं प्रपश्य ॥ ४९ ॥

संजय उवाच
इत्यर्जुनं वासुदेवस्तथोक्त्वा स्वकं रूपं(न्) दर्शयामास भूयः ।
आश्वासयामास च भीतमेनं भूत्वा पुनः सौम्यवपुर्महात्मा ॥ ५० ॥

अर्जुन उवाच
दृष्ट्वेदं मानुषं रूपं(न्) तव सौम्यं(ञ्) जनार्दन ।
इदानीमस्मि संवृत्तः सचेताः प्रकृतिं(ङ्) गतः ॥ ५१ ॥
श्रीभगवानुवाच
सुदुर्दर्शमिदं रूपं(न्) दृष्टवानसि यन्मम ।
देवा अप्यस्य रूपस्य नित्यं(न्) दर्शनकांक्षिणः ॥ ५२ ॥
नाहं वेदैर्न तपसा न दानेन न चेज्यया ।
शक्य एवंविधो द्रष्टुं(न्) दृष्टवानसि मां यथा ॥ ५३ ॥

भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन ।
ज्ञातुं(न्) द्रष्टुं(ञ्) च तत्त्वेन प्रवेष्टुं(ञ्) च परंतप ॥ ५४ ॥

मत्कर्मकृन्मत्परमो मद्भक्तः संगवर्जितः ।
निर्वैरः सर्वभूतेषु यः स मामेति पांडव ॥ ५५ ॥

ओं तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे **विश्वरूपदर्शनयोगोनाम एकादशोऽध्यायः**

---

# स्वर साधना - श्रीमद् भगवद्गीता

## द्वादशोऽध्यायः - भक्तियोगः

---

ओं श्रीकृष्णपरब्रह्मणे नमः / श्रीमद्भगवद्गीता /अथ द्वादशोऽध्यायः भक्तियोगः

अर्जुन उवाच
एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते ।
ये चाप्यक्षरमव्यक्तं(न्) तेषां(ङ्) के योगवित्तमाः ॥ १ ॥

श्रीभगवानुवाच
मय्यावेश्य मनो ये मां(न्) नित्ययुक्ता उपासते ।
श्रद्धया परयोपेतास्ते(ताः+ते) मे युक्ततमा मताः ॥ २ ॥
ये त्वक्षरमनिर्देश्यम(म्+अ)व्यक्तं पर्युपासते ।
सर्वत्रगमचिंत्यं(ञ्) च कूटस्थमचलं(न्) ध्रुवम् ॥ ३ ॥
संनियम्येंद्रियग्रामं सर्वत्र समबुद्धयः ।
ते प्राप्नुवंति मामेव सर्वभूतहिते रथाः ॥ ४ ॥
क्लेशोऽधिकतरस्तेषाम(म्+अ)व्यक्तासक्तचेतसाम् ।
अव्यक्ता हि गतिर्दुखं(न्) देहवद्भिरवाप्यते ॥ ५ ॥
ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः ।
अनन्ये नैव योगेन मां(न्) ध्यायंत उपासते ॥ ६ ॥
तेषामहं समुद्धर्ता मृत्युसंसारसागरात् ।
भवामि न चिरात्पार्थ मय्यावेशितचेतसाम् ॥ ७ ॥

मय्येव मन आधस्त्व मयि बुद्धिं(न्) निवेशय ।
निवसिष्यसि मय्येव अत ऊर्ध्वं(न्) न संशयः ॥ ८ ॥
अथ चित्तं समाधातुं(न्) न शक्नोषि मयि स्थिरम् ।
अभ्यासयोगेन ततो मामिच्छाप्तुं(न्) धनंजय ॥ ९ ॥
अभ्यासेऽप्यसमर्थोऽसि मत्कर्मपरमो भव ।
मदर्थमपि कर्माणि कुर्वन्सिद्धिमवाप्स्यसि ॥ १० ॥
अथैतदप्यशक्तोऽसि कर्तुं मद्योगमाश्रितः ।
सर्वकर्मफलत्यागं(न्) ततः कुरु यतात्मवान् ॥ ११ ॥
श्रेयो हि ज्ञानमभ्यासाज्ज्ञा(त्+ज्ञा)नाद्ध्यानं विशिष्यते ।
ध्यानात्कर्मफलत्यागस्त्या(गः+त्या)गाच्छांतिरनंतरम् ॥ १२ ॥
अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च ।
निर्ममो निरहंकारः समदुःखसुखः क्षमी ॥ १३ ॥
संतुष्टः सततं योगी यतात्मा दृढनिश्चयः ।
मय्यर्पितमनोबुद्धिर्यो(द्धिः+यो) मद्भक्तः स मे प्रियः ॥ १४ ॥
यस्मान्नो द्विजते लोको लोकान्नोद्विजते च यः ।
हर्षामर्षभयोद्वेगैर्मु(गैः+मु)क्तो यः स च मे प्रियः ॥ १५ ॥
अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः ।
सर्वारंभपरित्यागी यो मद्भक्तः स मे प्रियः ॥ १६ ॥
यो न हृष्यति न द्वेष्टि न शोचति न कांक्षति ।
शुभाशुभपरित्यागी भक्तिमान् यः स मे प्रियः ॥ १७ ॥
समः शत्रौ च मित्रे च तथा मानापमानयोः ।
शीतोष्णसुखदुःखेषु समस्संगविवर्जितः ॥ १८ ॥
तुल्यनिंदास्तुतिर्मौनी संतुष्टो येन केनचित् ।

अनिकेतः स्थिरमतिर्भ(तिः+भ)क्तिमान् मे प्रियो नरः ॥ १९ ॥
ये तु धर्म्यामृतमिदं यथोक्तं पर्युपासते ।
श्रद्धधाना मत्परमा भक्तास्तेऽतीव मे प्रियाः ॥ २० ॥

ओं तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे **भक्तियोगोनाम द्वादशोऽध्यायः** ॥ १२ ॥

---

|| ॐ श्री ||

# स्वर साधना - श्रीमद् भगवद्गीता

## त्रयोदशोऽध्यायः - क्षेत्रक्षेत्रज्ञयोगः

---

ओं श्रीकृष्णपरब्रह्मणे नमः | श्रीमद्भगवद्गीता | अथ त्रयोदशोऽध्यायः | क्षेत्रक्षेत्रज्ञयोगः

श्रीभगवानुवाच
इदं शरीरं(ङ्) कौंतेय क्षेत्रमित्यभिधीयते ।
एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः ॥ १ ॥
क्षेत्रज्ञं(ञ्) चापि मां विद्धि सर्वक्षेत्रेषु भारत ।
क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तज्ज्ञानं मतं मम ॥ २ ॥
तत्क्षेत्रं यच्च यादृक्च यद्विकारि यतश्च यत् ।
स च यो यत्प्रभावश्च तत्समासेन मे शृणु ॥ ३ ॥
ऋषिभिर्बहुधा गीतं(ञ्) छंदोभिर्विविधैः पृथक् ।
ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः ॥ ४ ॥
महाभूतान्यहंकारो बुद्धिरव्यक्तमेव च ।
इंद्रियाणि दशैकं(ञ्) च पंचचेंद्रियगोचराः ॥ ५ ॥

इच्छा द्वेषः सुखं(न्) दुःखं संघातश्चेतना धृतिः ।
एतत् क्षेत्रं समासेन सविकारमुदाहृतम् ॥ ६ ॥
अमानित्वमदंभित्वम(म्+अ)हिंसा क्षांतिरार्जवम् ।
आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः ॥ ७ ॥

इंद्रियार्थेषु वैराग्यम(म्+अ)नहंकार एव च ।
जन्ममृत्युजराव्याधि दुःखदोषानुदर्शनम् ॥ ८ ॥
असक्तिरनभिष्वंगः पुत्रदारगृहादिषु ।
नित्यं(ञ्) च समचित्तत्वमि(म्+इ)ष्टानिष्टोपपत्तिषु ॥ ९ ॥
मयि चानन्ययोगेन भक्तिरव्यभिचारिणी ।
विविक्तदेशसेवित्वम(म्+अ)रतिर्जनसंसदि ॥ १० ॥
अध्यात्मज्ञाननित्यत्वं(न्) तत्त्वज्ञानार्थदर्शनम् ।
एतज्ज्ञानमिति प्रोक्तम(म्+अ)ज्ञानं यदतोऽन्यथा ॥ ११ ॥
ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वामृतमश्नुते ।
अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते ॥ १२ ॥
सर्वतः पाणिपादं(न्)तत्स(त्+स)र्वतोऽक्षिशिरोमुखम् ।
सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥ १३ ॥
सर्वेंद्रियगुणाभासं सर्वेंद्रियविवर्जितम् ।
असक्तं सर्वभृच्चैव निर्गुणं(ङ्) गुणभोक्तृ च ॥ १४ ॥
बहिरंतश्च भूतानाम(म्+अ)चरं(ञ्) चरमेव च ।
सूक्ष्मत्वात्तदविज्ञेयं दूरस्थं(ञ्) चांतिके च तत् ॥ १५ ॥
अविभक्तं(ञ्) च भूतेषु विभक्तमिव च स्थितम् ।
भूतभर्तृ च तज्ज्ञेयं(ङ्) ग्रसिष्णु प्रभविष्णु च ॥ १६ ॥
ज्योतिषामपि तज्ज्योतिस्त(तिः+त)मसः परमुच्यते ।
ज्ञानं(म्) ज्ञेयं(म्) ज्ञानगम्यं हृदि सर्वस्य विष्ठितम् ॥ १७ ॥

इति क्षेत्रं(न्) तथा ज्ञानं(म्) ज्ञेयं(ञ्) चोक्तं समासतः ।
मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते ॥ १८ ॥
प्रकृतिं पुरुषं(ञ्) चैव विद्ध्यनादी उभावपि ।
विकारांश्च गुणांश्चैव विद्धि प्रकृति संभवान् ॥ १९ ॥
कार्यकरणकर्तृत्वे हेतुः प्रकृतिरुच्यते ।
पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते ॥ २० ॥
पुरुषः प्रकृतिस्थो हि भुंक्ते प्रकृतिजान् गुणान् ।
कारणं(ङ्) गुणसंगोऽस्य सदसद्योनिजन्मसु ॥ २१ ॥
उपद्रष्टानुमंता च भर्ता भोक्ता महेश्वरः ।
परमात्मेति चाप्युक्तो देहेऽस्मिन् पुरुषः परः ॥ २२ ॥
य एवं वेत्ति पुरुषं प्रकृतिं(ञ्) च गुणैः सह ।
सर्वथा वर्तमानोऽपि न स भूयोऽभिजायते ॥ २३ ॥
ध्यानेनात्मनि पश्यंति केचिदात्मानमात्मना ।
अन्ये सांख्येन योगेन कर्मयोगेन चापरे ॥ २४ ॥
अन्ये त्वेवमजानंतः श्रुत्वान्येभ्य उपासते ।
तेऽपि चातितरंत्येव मृत्युं श्रुतिपरायणाः ॥ २५ ॥
यावत्संजायते किंचित्स(त्+स)त्त्वं स्थावरजंगमम् ।
क्षेत्रक्षेत्रज्ञसंयोगात्त(त्+त)द्विद्धि भरतर्षभ ॥ २६ ॥
समं सर्वेषु भूतेषु तिष्ठंतं परमेश्वरम् ।
विनश्यत्स्वविनश्शंतं यः पश्यति स पश्यति ॥ २७ ॥
समं पश्यन् हि सर्वत्र समवस्थितमीश्वरम् ।

न हिनस्त्यात्मनात्मानं ततो याति परां(ङ्) गतिम् ॥ २८ ॥

प्रकृत्यैव च कर्माणि क्रियमाणानि सर्वशः ।

यः पश्यति तथात्मानम(म्+अ)कर्तारं स पश्यति ॥ २९ ॥

यदा भूतपृथग्भावमे(म्+ए)कस्थमनुपश्यति ।

तत एव च विस्तारं ब्रह्म संपद्यते तदा ॥ ३० ॥

अनादित्वान्निर्गुणत्वात्प(त्+प)रमात्मायमव्ययः ।

शरीरस्थोऽपि कौंतेय न करोति न लिप्यते ॥ ३१ ॥

यथा सर्वगतं सौक्ष्म्यादा(त्+आ)काशं(न्) नोपलिप्यते ।

सर्वत्रावस्थितो देहे तथात्मा नोपलिप्यते ॥ ३२ ॥

यथा प्रकाशयत्येकः कृत्स्नं(ल्) लोकमिमं रविः ।

क्षेत्रं(म्) क्षेत्री तथा कृत्स्नं प्रकाशयति भारत ॥ ३३ ॥

क्षेत्र क्षेत्रज्ञयोरेवम(म्+अ)ंतरं(म्) ज्ञानचक्षुषा ।

भूतप्रकृतिमोक्षं(ञ्) च ये विदुर्यांति ते परम् ॥ ३४ ॥

ओं तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे **क्षेत्रक्षेत्रज्ञविभागयोगोनाम त्रयोदशोऽध्यायः** ॥

---

|| ॐ श्री ||

## स्वर साधना - श्रीमद् भगवद्गीता

### चतुर्दशोऽध्यायः - गुणत्रयविभागयोगः

---

ओं श्रीकृष्णपरब्रह्मणे नमः / श्रीमद्भगवद्गीता /अथ चतुर्दशोऽध्यायः । गुणत्रयविभागयोगः

श्रीभगवानुवाच

परं भूयः प्रवक्ष्यामि ज्ञानानां ज्ञानमुत्तमम् ।
यज्ज्ञात्वा मुनयः सर्वे परां सिद्धिमितो गताः ॥ १ ॥

इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः ।
सर्गेऽपि नोपजायंते प्रलये न व्यथंति च ॥ २ ॥

मम योनिर्महद्ब्रह्म तस्मिन् गर्भं(न्) दधाम्यहम् ।
संभवः सर्वभूतानां(न्)  ततो भवति भारत ॥ ३ ॥

सर्वयोनिषु कौंतेय मूर्तयः संभवंति याः ।
तासां ब्रह्म महद्योनिर(निः+अ)हं बीजप्रदः पिता ॥ ४ ॥

सत्त्वं रजस्तम इति गुणाः प्रकृतिसंभवाः ।
निबध्नंति महाबाहो देहे देहिनमव्ययम् ॥ ५ ॥

तत्र सत्त्वं(न्) निर्मलत्वात्प्र(त्+प्र)काशकमनामयम् ।
सुखसंगेन बध्नाति ज्ञानसंगेन चानघ ॥ ६ ॥

रजो रागात्मकं विद्धि तृष्णा संगसमुद्भवम् ।
तन्निबध्नाति कौंतेय कर्मसंगेन देहिनम् ॥ ७ ॥

तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम् ।
प्रमादालस्यनिद्राभिस्त(भिः+त)न्निबध्नाति भारत ॥ ८ ॥

सत्त्वं सुखे संजयति रजः कर्मणि भारत ।

ज्ञानमावृत्य तु तमः प्रमादे संजयत्युत ॥ ९ ॥
रजस्तमश्चाभिभूय सत्त्वं भवति भारत ।
रजः सत्त्वं(न्) तमश्चैव तमः सत्त्वं रजस्तथा ॥ १० ॥
सर्वद्वारेषु देहेऽस्मिन् प्रकाश उपजायते ।
ज्ञानं यदा तदा विद्याद्वि(त्+वि)वृद्धं सत्त्वमित्युत ॥ ११ ॥
लोभः प्रवृत्तिरारंभः कर्मणामशमः स्पृहा ।
रजस्येतानि जायंते विवृद्धे भरतर्षभ ॥ १२ ॥
अप्रकाशोऽप्रवृत्तिश्च प्रमादो मोह एव च ।
तमस्येतानि जायंते विवृद्धे कुरुनंदन ॥ १३ ॥
यदा सत्त्वे प्रवृद्धे तु प्रलयं याति देहभृत् ।
तदोत्तमविदां लोकान(न्+अ)मलान्प्रतिपद्यते ॥ १४ ॥
रजसि प्रलयं(ङ्) गत्वा कर्मसंगिषु जायते ।
तथा प्रलीनस्तमसि मूढयोनिषु जायते ॥ १५ ॥
कर्मणः सुकृतस्याहुः सात्त्विकं(न्) निर्मलं फलम् ।
रजसस्तु फलं(न्) दुःखम(म्+अ)ज्ञानं(न्) तमसः फलम् ॥ १६ ॥
सत्त्वात्संजायते ज्ञानं रजसो लोभ एव च ।
प्रमादमोहौ तमसो भवतोऽज्ञानमेव च ॥ १७ ॥
ऊर्ध्वं(ङ्) गच्छंति सत्त्वस्था मध्ये तिष्ठंति राजसाः ।
जघन्यगुणवृत्तिस्था अधो गच्छंति तामसाः ॥ १८ ॥
नान्यं(ङ्) गुणेभ्यः कर्तारं यदा द्रष्टानुपश्यति ।
गुणेभ्यश्च परं वेत्ति मद्भावं सोऽधिगच्छति ॥ १९ ॥
गुणानेतानतीत्य त्रीन्दे(न्+दे)ही देहसमुद्भवान् ।
जन्ममृत्युजरादुःखैर्वि(खैः+वि)मुक्तोऽमृतमश्नुते ॥ २० ॥

अर्जुन उवाच
कैर्लिंगैस्त्रीन्गुणानेतान(न्+अ)तीतो भवति प्रभो ।
किमाचारः कथं(ञ्) चैतांस्त्रीन्गुणानतिवर्तते ॥ २१ ॥
श्रीभगवानुवाच
प्रकाशं(ञ्) च प्रवृत्तिं(ञ्) च मोहमेव च पांडव ।
न द्वेष्टि संप्रवृत्तानि न निवृत्तानि कांक्षति ॥ २२ ॥
उदासीनवदासीनो गुणैर्यो न विचाल्यते ।
गुणा वर्तंत इत्येव योऽवतिष्ठति नेंगते ॥ २३ ॥
समदुःखसुखः स्वस्थः समलोष्टाश्मकांचनः ।
तुल्यप्रियाप्रियो धीरस्तु(रः+तु)ल्यनिंदात्म संस्तुतिः ॥ २४ ॥
मानापमानयोस्तुल्यस्तु(ल्यः+तु)ल्यो मित्रारिपक्षयोः ।
सर्वारंभपरित्यागी गुणातीतः स उच्यते ॥ २५ ॥
मां(ञ्) च योऽव्यभिचारेण भक्तियोगेन सेवते ।
स गुणान्समतीत्यैतान् ब्रह्मभूयाय कल्पते ॥ २६ ॥
ब्रह्मणो हि प्रतिष्ठाहम(म्+अ)मृतस्याव्ययस्य च ।
शाश्वतस्य च धर्मस्य सुखस्यैकांतिकस्य च ॥ २७ ॥

ओं तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे **गुणत्रयविभागयोगोनाम चतुर्दशोऽध्यायः** ॥ १४ ॥

|| ॐ श्री ||

# स्वर साधना - श्रीमद् भगवद्गीता

## पंचदशोऽध्यायः - पुरुषोत्तमयोगः

---

ओं श्रीकृष्णपरब्रह्मणे नमः / श्रीमद्भगवद्गीता / पंचदशोऽध्यायः पुरुषोत्तमयोगः

श्रीभगवानुवाच

ऊर्ध्वमूलमधःशाखम(म्+अ)श्वत्थं प्राहुरव्ययम् ।
छंदांसि यस्य पर्णानि यस्तं वेद स वेदवित् ॥ १ ॥

अधश्चोर्ध्वं प्रसृतास्तस्य शाखा गुणप्रवृद्धा विषयप्रवालाः ।
अधश्च मूलान्यनुसंततानि कर्मानुबंधीनि मनुष्यलोके ॥ २ ॥

न रूपमस्येह तथोपलभ्यते नांतो न चादिर्न च संप्रतिष्ठा ।
अश्वत्थमेनं सुविरूढमूलम(म्+अ)संगशस्त्रेण दृढेन छित्त्वा ॥ ३ ॥

ततः पदं(न्) तत्परिमार्गितव्यं यस्मिन्गता न निवर्तंति भूयः ।
तमेव चाद्यं पुरुषं प्रपद्ये यतः प्रवृत्तिः प्रसृता पुराणी ॥ ४ ॥

निर्मानमोहा जितसंगदोषा अध्यात्मनित्या विनिवृत्तकामाः ।
द्वंद्वैर्विमुक्ताः सौखदुःखसंज्ञैर्ग(ज्ञैः+ग)च्छंत्यमूढाः पदमव्ययं(न्) तत् ॥
५॥

न तद्भासयते सूर्यो न शशांको न पावकः ।
यद्गत्वा न निवर्तंते तद्धाम परमं मम ॥ ६ ॥

ममैवांशो जीवलोके जीवभूतः सनातनः ।
मनःषष्ठानींद्रियाणि प्रकृतिस्थानि कर्षति ॥ ७ ॥

शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः ।
गृहीत्वैतानि संयाति वायुर्गंधानिवाशयात् ॥ ८ ॥

श्रॊत्रं(ञ्) चक्षुः स्पर्शनं(ञ्) च रसनं(ङ्) घ्राणमॆव च ।
अधिष्ठाय मनश्चायं विषयानुपसॆवतॆ ॥ ९ ॥
उत्क्रामंतं स्थितं वापि भुंजानं वा गुणान्वितम् ।
विमूढा नानुपश्यंति पश्यंति ज्ञानचक्षुषः ॥ १० ॥
यतंतॊ यॊगिनश्चैनं पश्यंत्यात्मन्यवस्थितम् ।
यतंतॊऽप्यकृतात्मानॊ नैनं पश्यंत्यचॆतसः ॥ ११ ॥
यदादित्यगतं(न्) तॆजॊ जगद्भासयतॆऽखिलम् ।
यच्चंद्रमसि यच्चाग्नौ तत्तॆजॊ विद्धि मामकम् ॥ १२ ॥

गामाविश्य च भूतानि धारयाम्यहमॊजसा ।
पुष्णामि चौषधीः सर्वाः सॊमॊ भूत्वा रसात्मकः ॥ १३ ॥
अहं वैश्वानरॊ भूत्वा प्राणनां(न्) दॆहमाश्रितः ।
प्राणापानसमायुक्तः पचाम्यन्नं(ञ्) चतुर्विधम्॥ १४ ॥
सर्वस्य चाहं हृदि संनिविष्टॊ मत्तः स्मृतिर्ज्ञानमपॊहनं(ञ्) च ।
वॆदैश्च सर्वैरहमॆव वॆद्यॊ वॆदांतकृद्वॆदविदॆव चाहम् ॥ १५ ॥
द्वाविमौ पुरुषौ लॊकॆ क्षरश्चाक्षर ऎव च ।
क्षरः सर्वाणि भूतानि कूटस्थॊऽक्षर उच्यतॆ ॥ १६ ॥
उत्तमः पुरुषस्त्वन्यः परमात्मॆत्युदाहृतः ।
यॊ लॊकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ॥ १७ ॥
यस्मात् क्षरमतीतॊऽहम(म्+अ)क्षरादपि चॊत्तमः ।
अतॊऽस्मि लॊकॆ वॆदॆ च प्रथितः पुरुषॊत्तमः ॥ १८ ॥
यॊ मामॆवमसंमूढॊ जानाति पुरुषॊत्तमम् ।
स सर्वविद्भजति मां सर्वभावॆन भारत ॥ १९ ॥

इति गुह्यतमं शास्त्रमि(म्+इ)दमुक्तं मयानघ ।
ऐतद्बुद्ध्वा बुद्धिमान् स्यात्कृ(त्+कृ)तकृत्यश्च भारत ॥ २० ॥

ऑं तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां यॊगशास्त्रे श्रीकृष्णार्जुनसंवादे **पुरुषॊत्तमयॊगॊनाम पंचदशॊऽध्यायः** ॥ १५ ॥

---

|| ॐ श्री ||

# स्वर साधना - श्रीमद् भगवद्गीता

## षोडशोऽध्यायः - दैवासुर संपद्विभागयोगः

---

ओं श्रीकृष्णपरब्रह्मणे नमः / श्रीमद्भगवद्गीता / अथ षोडशोऽध्यायः / दैवासुर संपद्विभागयोगः

श्रीभगवानुवाच

अभयं सत्त्वसंशुद्धिर्ज्ञा(द्धिः+ज्ञा)नयोगव्यवस्थितिः ।
दानं(न्) दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम् ॥ १ ॥
अहिंसा सत्यमक्रोधस्त्या(धः+त्या)गः शांतिरपैशुनम् ।
दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम् ॥ २ ॥
तेजः क्षमा धृतिः शौचम(म्+अ)द्रोहो नातिमानिता ।
भवंति संपदं(न्) दैवीम(म्+अ)भिजातस्य भारत ॥ ३ ॥
दंभो दर्पोऽभिमानश्च क्रोधः पारुष्यमेव च ।
अज्ञानं(ञ्) चाभिजातस्य पार्थ संपदमासुरीम् ॥ ४ ॥
दैवीसंपद्विमोक्षाय निबंधायासुरी मता ।
मा शुचः संपदं(न्) दैवीम(म्+अ)भिजातोऽसि पांडव ॥ ५ ॥
द्वौ भूतसर्गौ लोकेऽस्मिन् दैव आसुर एव च ।
दैवो विस्तरशः प्रोक्त आसुरं पार्थ मे शृणु ॥ ६ ॥
प्रवृत्तिं(ञ्) च निवृत्तिं(ञ्) च जना न विदुरासुराः ।
न शौचं(न्) नापि चाचारो न सत्यं(न्) तेषु विद्यते ॥ ७ ॥
असत्यमप्रतिष्ठं(न्) ते जगदाहुरनीश्वरम् ।
अपरस्परसंभूतं(ङ्) किमन्यत् कामहैतुकम् ॥ ८ ॥
एतां(न्) दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः ।

प्रभवंत्युग्रकर्माणः क्षयाय जगतोऽहिताः ॥ ९ ॥
काममाश्रित्य दुष्पूरं(न्) दंभमानमदान्विताः ।
मोहाद्गृहीत्वासद्ग्राहान् प्रवर्तंतेऽशुचिव्रताः ॥ १० ॥
चिंतामपरिमेयां(ञ्) च प्रलयांतामुपाश्रिताः ।
कामोपभोगपरमा एतावदिति निश्चिताः ॥ ११ ॥
आशापाशशतैर्बद्धाः कामक्रोधपरायणाः ।
ईहंते कामभोगार्थम(म्+अ)न्यायेनार्थसंचयान् ॥ १२ ॥
इदमद्य मया लब्धमि(म्+इ)मं प्राप्स्ये मनोरथम् ।
इदमस्तीदमपि मे भविष्यति पुनर्धनम् ॥ १३ ॥
असौ मया हतः शत्रुर्ह(त्रुः+ह)निष्ये चापरानपि ।
ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान्सुखी ॥ १४ ॥
आढ्योऽभिजनवानस्मि कोऽन्योऽस्ति सदृशो मया ।
यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिताः ॥ १५ ॥
अनेकचित्तविभ्रांता मोहजालसमावृताः ।
प्रसक्ताः कामभोगेषु पतंति नरकेऽशुचौ ॥ १६ ॥
आत्म संभाविताः स्तब्धा(ः)धनमानमदान्विताः ।
यजंते नामयज्ञैस्ते दंभेनाविधिपूर्वकम् ॥ १७ ॥
अहंकारं बलं(न्) दर्पं(ङ्) कामं(ङ्) क्रोधं(ञ्) च संश्रिताः ।
मामात्म परदेहेषु प्रद्विषंतोऽभ्यसूयकाः ॥ १८ ॥
तानहं(न्) द्विषतः क्रूरान् संसारेषु नराधमान् ।
क्षिपाम्यजस्रमशुभाना(न्+आ)सुरीष्वेव योनिषु ॥ १९ ॥
आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि ।
मामप्राप्यैव कौंतेय ततो यांत्यधमां(ङ्) गतिम् ॥ २० ॥

त्रिविधं(न्) नरकस्येदं(न्) द्वारं(न्) नाशनमात्मनः ।
कामः क्रोधस्तथा लोभस्त(भः+त)स्मादेतत्त्रयं(न्) त्यजेत् ॥ २१ ॥
ऐतैर्विमुक्तः कौंतेय तमोद्वारैस्त्रिभिर्नरः ।
आचरत्यात्मनः श्रेयस्त(यः+त)तो याति परां(ङ्) गतिम् ॥ २२ ॥
यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः ।
न स सिद्धिमवाप्नोति न सुखं(न्) न परां(ङ्) गतिम् ॥ २३ ॥
तस्माच्छास्त्रं प्रमाणं(न्) ते कार्याकार्यव्यवस्थितौ ।
ज्ञात्वा शास्त्रविधानोक्तं(ङ्) कर्म कर्तुमिहार्हसि ॥ २४ ॥

ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे **दैवासुरसंपद्विभागयोगोनाम षोडशोऽध्यायः** ॥ १६ ॥

|| ॐ श्री ||

# स्वर साधना - श्रीमद् भगवद्गीता

## सप्तदशोऽध्यायः - श्रद्धात्रयविभाग योगः

---

ओं श्रीकृष्णपरब्रह्मणे नमः / श्रीमद्भगवद्गीता / अथ सप्तदशोऽध्यायः/ श्रद्धात्रयविभाग योगः

अर्जुन उवाच
ये शास्त्रविधिमुत्सृज्य यजंते श्रद्धयान्विताः ।
तेषां(न्) निष्ठा तु का कृष्ण सत्त्वमाहो रजस्तमः ॥ १ ॥

श्री भगवानुवाच
त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा ।
सात्त्विकी राजसी चैव तामसी चेति तां शृणु ॥ २ ॥
सत्त्वानुरूपा सर्वस्य श्रद्धा भवति भारत ।
श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धः स एव सः ॥ ३ ॥
यजंते सात्त्विका देवान्य(न्+य)क्षरक्षांसि राजसाः ।
प्रेतान्भूतगणांश्चान्ये यजंते तामसा जनाः ॥ ४ ॥
अशास्त्रविहितं(ङ्) घोरं(न्) तप्यंते ये तपो जनाः ।
दंभाहंकारसंयुक्ताः कामरागबलान्विताः ॥ ५ ॥
कर्शयंतः शरीरस्थं भूतग्राममचेतसः ।
मां(ञ्)चैवांतः शरीरस्थं(न्) तान्विद्ध्यासुरनिश्चयान् ॥ ६ ॥
आहारस्त्वपि सर्वस्य त्रिविधो भवति प्रियः ।
यज्ञस्तपस्तथा दानं(न्) तेषां भेदमिमं शृणु ॥ ७ ॥
आयुःसत्त्वबलारोग्यसुखप्रीति विवर्धनाः ।
रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्त्विकप्रियाः ॥ ८ ॥

कट्वम्ललवणात्युष्ण तीक्ष्णरुक्षविदाहिनः ।
आहारा राजसस्येष्टा दुःखशोकामयप्रदाः ॥ ९ ॥
यातयामं(ङ्) गतरसं पूति पर्युषितं(ञ्) च यत् ।
उच्छिष्टमपि चामेध्यं भोजनं(न्) तामसप्रियम् ॥ १० ॥
अफलाकांक्षिभिर्यज्ञो विधिदृष्टो य इज्यते ।
यष्टव्यमेवेति मनः समाधाय स सात्त्विकः ॥ ११ ॥
अभिसंधाय तु फलं(न्) दंभार्थमपि चैव यत् ।
इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसम् ॥ १२ ॥
विधिहीनमसृष्टान्नं मंत्रहीनमदक्षिणम् ।
श्रद्धाविरहितं यज्ञं(न्) तामसं परिचक्षते ॥ १३ ॥
देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम् ।
ब्रह्मचर्यमहिंसा च शारीरं(न्) तप उच्यते ॥ १४ ॥
अनुद्वेगकरं वाक्यं सत्यं प्रियहितं(ञ्) च यत् ।
स्वाध्यायाभ्यसनं(ञ्) चैव वाङ्मयं(न्) तप उच्यते ॥ १५ ॥
मनः प्रसादः सौम्यत्वं मौनमात्मविनिग्रहः ।
भावसंशुद्धिरित्येतत्त(त्+त)पो मानसमुच्यते ॥ १६ ॥
श्रद्धया परया तप्तं(न्) तपस्तत्त्रिविधं(न्) नरैः ।
अफलाकांक्षिभिर्युक्तैः सात्त्विकं परिचक्षते ॥ १७ ॥
सत्कारमानपूजार्थं(न्) तपो दंभेन चैव यत् ।
क्रियते तदिह प्रोक्तं राजसं(ञ्) चलमध्रुवम् ॥ १८ ॥
मूढग्राहेणात्मनो यत्पी(त्+पी)डया क्रियते तपः ।
परस्योत्सादनार्थं वा तत्तामसमुदाहृतम् ॥ १९ ॥

दातव्यमिति यद्दानं(न्) दीयतेऽनुपकारिणे ।
देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम् ॥ २० ॥

यत्तुप्रत्युपकारार्थं फलमुद्दिश्य वा पुनः ।
दीयते च परिक्लिष्टं(न्) तद्दानं राजसं स्मृतम् ॥ २१ ॥

अदेशकाले यद्दानम(म्+अ)पात्रेभ्यश्च दीयते ।
असत्कृतमवज्ञातं(न्) तत्तामसमुदाहृतम् ॥ २२ ॥

ओं तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः ।
ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा ॥ २३ ॥

तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः ।
प्रवर्तंते विधानोक्ताः सततं ब्रह्मवादिनाम् ॥ २४ ॥

तदित्यनभिसंधाय फलं यज्ञतपः क्रियाः ।
दानक्रियाश्च विविधाः क्रियंते मोक्षकांक्षिभिः ॥ २५ ॥

सद्भावे साधुभावे च सदित्येतत्प्रयुज्यते ।
प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ युज्यते ॥ २६ ॥

यज्ञे तपसि दाने च स्थितिः सदिति चोच्यते ।
कर्म चैव तदर्थीयं सदित्येवाभिधीयते ॥ २७ ॥

अश्रद्धया हुतं(न्) दत्तं(न्) तपस्तप्तं(ङ्)कृतं(ञ्) च यत् ।
असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह ॥ २८ ॥

ओं तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे **श्रद्धात्रयविभागयोगोनाम सप्तदशोऽध्यायः** ॥ १७ ॥

---

|| ॐ श्री ||

# स्वर साधना - श्रीमद् भगवद्गीता

## अष्टादशोऽध्यायः - मोक्षसंन्यास योगः

---



अर्जुन उवाच

संन्यासस्य महाबाहो तत्त्वमिच्छामि वेदितुम् ।
त्यागस्य च हृषीकेश पृथक्केशिनिषूदन ॥ १ ॥

श्री भगवानुवाच

काम्यानां(ङ्) कर्मणां(न्) न्यासं संन्यासं(ङ्) कवयो विदुः ।
सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः ॥ २ ॥
त्याज्यं(न्) दोषवदित्येके कर्म प्राहुर्मनीषिणः ।
यज्ञदानतपः कर्म न त्याज्यमिति चापरे ॥ ३ ॥
निश्चयं शृणु मे तत्र त्यागे भरतसत्तम ।
त्यागो हि पुरुषव्याघ्र त्रिविधः संप्रकीर्तितः ॥ ४ ॥
यज्ञ दान तपः कर्म न त्याज्यं(ङ्) कार्यमेव तत् ।
यज्ञो दानं(न्) तपश्चैव पावनानि मनीषिणाम् ॥ ५ ॥
एतान्यपि तु कर्माणि संगं(न्) त्यक्त्वा फलानि च ।
कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम् ॥ ६ ॥
नियतस्य तु संन्यासः कर्मणो नोपपद्यते ।
मोहात्तस्य परित्यागस्ता(गः+ता)मसः परिकीर्तितः ॥ ७ ॥
दुःखमित्येव यत्कर्म कायक्लेशभयात्त्यजेत् ।
स कृत्वा राजसं(न्) त्यागं(न्) नैव त्यागफलं लभेत् ॥ ८ ॥

कार्यमित्येव यत्कर्म नियतं(ङ्) क्रियतेऽर्जुन ।
संगं(न्)  त्यक्त्वा फलं(ञ्) चैव स त्यागः सात्त्विको मतः ॥ ९ ॥
न द्वेष्ट्यकुशलं(ङ्) कर्म कुशले नानुषज्जते ।
त्यागी सत्त्वसमाविष्टो मेधावी छिन्नसंशयः ॥ १० ॥
न हि देहभृता शक्यं(न्) त्यक्तुं(ङ्) कर्माण्यशेषतः ।
यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते ॥ ११ ॥
अनिष्टमिष्टं मिश्रं(ञ्) च त्रिविधं(ङ्) कर्मणः फलम् ।
भवत्यत्यागिनां प्रेत्य न तु संन्यासिनां(ङ्) क्वचित् ॥ १२ ॥
पंचैतानि महाबाहो कारणानि निबोध मे ।
सांख्ये कृतांते प्रोक्तानि सिद्धये सर्वकर्मणाम् ॥ १३ ॥
अधिष्ठानं(न्) तथा कर्ता करणं(ञ्) च पृथग्विधम् ।
विविधाश्च पृथक्चेष्टा दैवं(ञ्) चैवात्र पंचमम् ॥ १४ ॥
शरीरवाङ्मनोभिर्य(भिः+य)त्कर्म प्रारभते नरः ।
न्याय्यं वा विपरीतं वा पंचैते तस्य हेतवः ॥ १५ ॥
तत्रैवं सति कर्तारमा(म्+आ)त्मानं(ङ्) केवलं(न्) तु यः ।
पश्यत्यकृतबुद्धित्वान्न(त्+न) स पश्यति दुर्मतिः ॥ १६ ॥
यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते ।
हत्वापि स इमांल्लोकान्न(न्+न) हंति न निबध्यते ॥ १७ ॥
ज्ञानं(म्) ज्ञेयं परिज्ञाता त्रिविधा कर्मचोदना ।
करणं(ङ्) कर्म कर्तेति त्रिविधः कर्मसंग्रहः ॥ १८ ॥
ज्ञानं(ङ्) कर्म च कर्ता च त्रिधैव गुणभेदतः ।
प्रोच्यते गुणसंख्याने यथावच्छृणु तान्यपि ॥ १९ ॥

सर्वभूतेषु येनैकं भावमव्ययमीक्षते ।
अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम् ॥ २० ॥
पृथक्त्वेन तु यज्ज्ञानं(न्) नानाभावान् पृथग्विधान् ।
वेत्ति सर्वेषु भूतेषु तज्ज्ञानं विद्धि राजसम् ॥ २१ ॥
यत्तु कृत्स्नवदेकस्मिन् कार्ये सक्तमहैतुकम् ।
अतत्त्वार्थवदल्पं(ञ्) च तत्तामसमुदाहृतम् ॥ २२ ॥
नियतं संगरहितम(म्+अ)रागद्वेषतः कृतम् ।
अफलप्रेप्सुना कर्म यत्तत्सात्त्विकमुच्यते ॥ २३ ॥
यत्तु कामेप्सुना कर्म साहंकारेण वा पुनः ।
क्रियते बहुलायासं(न्) तद्राजसमुदाहृदम् ॥ २४ ॥
अनुबंधं(म्) क्षयं हिंसाम(म्+अ)नवेक्ष्य च पौरुषम् ।
मोहादारभ्यते कर्म यत्तत्तामसमुच्यते ॥ २५ ॥
मुक्तसंगोऽनहंवादी धृत्युत्साहसमन्वितः ।
सिद्ध्यसिद्ध्योर्निर्विकारः कर्ता सात्त्विक उच्यते ॥ २६ ॥
रागी कर्मफलप्रेप्सुर्लु(प्सुः+लु)ब्धो हिंसात्मकोऽशुचिः ।
हर्षशोकान्वितः कर्ता राजसः परिकीर्तितः ॥ २७ ॥
अयुक्तः प्राकृतः स्तब्धः शठो नैष्कृतिकोऽलसः ।
विषादी दीर्घसूत्री च कर्ता तामस उच्यते ॥ २८ ॥
बुद्धेर्भेदं(न्) धृतेश्चैव गुणतस्त्रिविधं शृणु ।
प्रोच्यमानमशेषेण पृथक्त्वेन धनंजय ॥ २९ ॥
प्रवृत्तिं(ञ्) च निवृत्तिं(ञ्) च कार्याकार्ये भयाभये ।
बंधं मोक्षं(ञ्) च या वेत्ति बुद्धिः सा पार्थ सात्त्विकी ॥ ३० ॥
यया धर्ममधर्मं(ञ्) च कार्यं(ञ्) चाकार्यमेव च ।

अयथावत्प्रजानाति बुद्धिः सा पार्थ राजसी ॥ ३१ ॥
अधर्मं(न्) धर्ममिति या मन्यतॆ तमसावृता ।
सर्वार्थान् विपरीतांश्च बुद्धिः सा पार्थ तामसी ॥ ३२ ॥
धृत्या यया धारयतॆ मनः प्राणॆंद्रियक्रियाः ।
यॊगॆनाव्यभिचारिण्या धृतिः सा पार्थ सात्त्विकी ॥ ३३ ॥
यया तु धर्मकामार्थान् धृत्या धारयतॆऽर्जुन ।
प्रसंगॆन फलाकांक्षी धृतिः सा पार्थ राजसी ॥ ३४ ॥
यया स्वप्नं भयं शॊकं विषादं मदमॆव च ।
न विमुंचति दुर्मॆधा धृतिः सा पार्थ तामसी ॥ ३५ ॥
सुखं(न्) त्विदानीं(न्) त्रिविधं शृणु मॆ भरतर्षभ ।
अभ्यासाद्रमतॆ यत्र दुःखांतं (ञ्) च निगच्छति ॥ ३६ ॥
यत्तदग्रॆ विषमिव परिणामॆऽमृतॊपमम् ।
तत्सुखं सात्त्विकं प्रॊक्तमा(म्+आ)त्मबुद्धिप्रसादजम् ॥ ३७ ॥
विषयॆंद्रियसंयॊगाद्य(त्+य)त्तदग्रॆऽमृतॊपमम् ।
परिणामॆ विषमिव तत्सुखं राजसं स्मृतम् ॥ ३८ ॥
यदग्रॆ चानुबंधॆ च सुखं मॊहनमात्मनः ।
निद्रालस्यप्रमादॊत्थं(न्) तत्तामसमुदाहृतम् ॥ ३९ ॥
न तदस्ति पृथिव्यां वा दिवि दॆवॆषु वा पुनः ।
सत्त्वं प्रकृतिजैर्मुक्तं यदॆभिः स्यात् त्रिभिर्गुणैः ॥ ४० ॥
ब्राह्मण क्षत्रियविशां शूद्राणां(ञ्) च परंतप ।
कर्माणि प्रविभक्तानि स्वभाव प्रभवैर्गुणैः ॥ ४१ ॥
शमॊ दमस्तपः शौचं क्षांतिरार्जवमॆव च ।
ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजम् ॥ ४२ ॥

शौर्यं(न्) तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम् ।
दानमीश्वरभावश्च क्षात्रं(ङ्) कर्म स्वभावजम् ॥ ४३ ॥
कृषिगौरक्ष्यवाणिज्यं वैश्यकर्म स्वभावजम् ।
परिचर्यात्मकं(ङ्) कर्म शूद्रस्यापि स्वभावजम् ॥ ४४ ॥
स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः ।
स्वकर्मनिरतः सिद्धिं यथा विंदति तच्छृणु ॥ ४५ ॥
यतः प्रवृत्तिर्भूतानां येन सर्वमिदं(न्) ततम् ।
स्वकर्मणा तमभ्यर्च्य सिद्धिं विंदति मानवः ॥ ४६ ॥
श्रेयान् स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् ।
स्वभावनियतं(ङ्) कर्म कुर्वन्नाप्नोति किल्बिषम् ॥ ४७ ॥
सहजं(ङ्) कर्म कौंतेय सदोषमपि न त्यजेत् ।
सर्वारंभा हि दोषेण धूमेनाग्निरिवावृताः ॥ ४८ ॥
असक्तबुद्धिः सर्वत्र जितात्मा विगतस्पृहः ।
नैष्कर्म्यसिद्धिं परमां संन्यासेनाधिगच्छति ॥ ४९ ॥
सिद्धिं प्राप्तो यथा ब्रह्म तथाप्नोति निबोध मे ।
समासेनैव कौंतेय निष्ठा ज्ञानस्य या परा ॥ ५० ॥
बुद्ध्या विशुद्धया युक्तो धृत्यात्मानं(न्) नियम्य च ।
शब्दादीन्विषयांस्त्यक्त्वा रागद्वेषौ व्युदस्य च ॥ ५१ ॥
विविक्तसेवी लघ्वाशी यतवाक्कायमानसः ।
ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः ॥ ५२ ॥
अहंकारं बलं(न्) दर्पं(ङ्) कामं(ङ्) क्रोधं परिग्रहम् ।
विमुच्य निर्ममः शांतो ब्रह्मभूयाय कल्पते ॥ ५३ ॥

ब्रह्मभूतः प्रसन्नात्मा न शोचति न कांक्षति ।
समः सर्वेषु भूतेषु मद्भक्तिं(ल्) लभते पराम् ॥ ५४ ॥
भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः ।
ततो मां(न्) तत्त्वतो ज्ञात्वा विशते तदनंतरम् ॥ ५५ ॥
सर्वकर्माण्यपि सदा कुर्वाणो मद्व्यपाश्रयः ।
मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययम् ॥ ५६ ॥
चेतसा सर्वकर्माणि मयि संन्यस्य मत्परः ।
बुद्धियोगमुपाश्रित्य मच्चित्तः सततं भव ॥ ५७ ॥
मच्चित्तः सर्वदुर्गाणि मत्प्रसादात्तरिष्यसि ।
अथ चेत्त्वमहंकारान्न(त्+न) श्रोष्यसि विनंक्ष्यसि ॥ ५८ ॥
यदहंकारमाश्रित्य न योत्स्य इति मन्यसे ।
मिथ्यैष व्यवसायस्ते प्रकृतिस्त्वां(न्) नियोक्ष्यति ॥ ५९ ॥
स्वभावजेन कौंतेय निबद्धः स्वेन कर्मणा ।
कर्तुं(न्) नेच्छसि यन्मोहात् करिष्यस्यवशोऽपि तत् ॥ ६० ॥
ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ।
भ्रामयन्सर्वभूतानि यंत्रारुढानि मायया ॥ ६१ ॥
तमेव शरणं(ङ्) गच्छ सर्वभावेन भारत ।
तत्प्रसादात्परां शांतिं स्थानं प्राप्स्यसि शाश्वतम् ॥ ६२ ॥
इति ते ज्ञानमाख्यातं(ङ्) गुह्याद्गुह्यतरं मया ।
विमृश्यैतदशेषेण यथेच्छसि तथा कुरु ॥ ६३ ॥
सर्वगुह्यतमं भूयः शृणु मे परमं वचः ।
इष्टोसि मे दृढमिति ततो वक्ष्यामि ते हितम् ॥ ६४ ॥

मन्मना भव मद्भक्तो मद्याजी मां(न्) नमस्कुरु ।
मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे ॥ ६५ ॥
सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज ।
अहं(न्) त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥ ६६ ॥
इदं ते नातपस्काय नाभक्ताय कदाचन ।
न चाशुश्रूषवे वाच्यं(न्) न च मां योऽभ्यसूयति ॥ ६७ ॥
य इमं परमं(ङ्) गुह्यं मद्भक्तेष्वभिधास्यति ।
भक्तिं मयि परां(ङ्) कृत्वा मामेवैष्यत्यसंशयः ॥ ६८ ॥
न च तस्मान्मनुष्येषु कश्चिन्मे प्रियकृत्तमः ।
भविता न च मे तस्माद(त्+अ)न्यः प्रियतरो भुवि ॥ ६९ ॥
अध्येष्यते च य इमं(न्) धर्म्यं संवादमावयोः ।
ज्ञानयज्ञेन तेनाहमि(म्+इ)ष्टः स्यामिति मे मतिः ॥ ७० ॥
श्रद्धावाननसूयश्च शृणुयादपि यो नरः ।
सोऽपि मुक्तः शुभांल्लोकान्प्रा(न्+प्रा)प्नुयात्पुण्यकर्मणाम् ॥ ७१ ॥
कच्चिदेतच्छ्रुतं पार्थ त्वयैकाग्रेण चेतसा ।
कच्चिदज्ञानसंमोहः प्रनष्टस्ते धनंजय ॥ ७२ ॥

अर्जुन उवाच
नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान्मयाच्युत ।
स्थितोऽस्मि गतसंदेहः करिष्ये वचनं(न्) तव ॥ ७३ ॥
संजय उवाच
इत्यहं वासुदेवस्य पार्थस्य च महात्मनः ।
संवादमिममश्रौषम(म्+अ)द्भुतं रोमहर्षणम् ॥ ७४ ॥

व्यासप्रसादाच्छ्रुतवाने(न्+ऐ)तद्गुह्यमहं परम् ।
यॊगं यॊगेश्वरात्कृष्णात्सा(त्+सा)क्षात्कथयतः स्वयम् ॥ ७५ ॥
राजन्संस्मृत्य संस्मृत्य संवादमिममद्भुतम् ।
केशवार्जुनयॊः पुण्यं हृष्यामि च मुहुर्मुहुः ॥ ७६ ॥
तच्च संस्मृत्य संस्मृत्य रूपमत्यद्भुतं हरेः ।
विस्मयॊ मे महान् राजन् हृष्यामि च पुनः पुनः ॥ ७७ ॥
यत्र यॊगेश्वरः कृष्णॊ यत्र पार्थॊ धनुर्धरः ।
तत्र श्रीर्विजयॊ भूतिर्ध्रु(तिः+ध्रु)वा नीतिर्मतिर्मम ॥ ७८ ॥

ऒं तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां यॊगशास्त्रे श्रीकृष्णार्जुनसंवादे **मॊक्षसंन्यासयॊगॊनाम अष्टादशॊऽध्यायः** ॥ १८ ॥

॥हरिः ऒं तत्सत् ॥

---

||ॐ श्री गुरुभ्यो नमः||
||ॐ श्री महालसायै नमः||

Offering Special Pranams to my Kula Guru **Sadhguru Shrimadh Sudhindra Teertha Swamiji & Sadhguru Shrimadh Samyamindra Teertha Swamiji, Kashi Mutt Samsthan Varanasi.** Without the support of other live masters around who are constantly working towards Sanatan Dharma and uplifting human consciousness It would not have been possible for me to learn any state of art.



I pay special tribute to my Mother and father **Smt. Suguna Gokul Kamath & Shri Gokuldas Kamath** for initiating me at very young age to writing mantras and making me independent, special gratitude to My music Teachers Vasanthi akka, **Pandit Ananth Bhagawat Guruji** and **Guruma Mahadevi Bhagwath,** and my current music **Guruma Basthy Kavitha Shenoy** for helping me appreciate the value of Nada Music and every of my Family every members who supported me..

Special Thanks to **Pandit Jagannath Shastryji** for teaching me the profound knowledge of The Bhagavad-Gita and my path towards teaching Sanskrit.

Special thanks to all my teachers and specially My Sanskrit teacher **Smt Jalajakshi Amma**, and my Chikamma **Smt Bharathi R. Kamath** and **Smt**. **Gayathri Satyanarayan Prabhu**, who always filled me with stories of Bhakta Prahalada, Nala Damayanti, Mahabharatha, Ramayana and Dashavatar that made me fall dearly in love with our rich culture.

My Pranam at the divine feet of my Husband **Shri Basthi Gautham Pai** for not just volunteering with me but also tirelessly encouraging me towards conducting events encouraging various talents in people around me.

And Most importantly our dearest Mother India, Bharathi akka, aka Smt. Jaya Nayak who gave me so many books to learn from, and always encouraged me. Besides, I also thank our dearest Bhatmam, Shastra Parangath, Pandit and Purohit **Jodumutt Venkatesh Bhatmam** and **Smt. Vinuta Venkatesh and their children** who constantly encourage and guide me into different aspects of life. Special Thanks to all learners who trusts in my ability to deliver such a graceful subject.

Contributions collected towards learning with me is offered graciously to the Cauvery Calling Campaign by Isha Foundation, Annadanam Seva for Mahalaya Amavasya at Linga Bhairavi Temple, Coimbatore.

Text Source: Internet, Text Books, Self developed knowledge.
All Copyrights is owned by the original creator of the knowledge.
Organised and Conducted: skamath77@gmail.com
Email for Copyrights and credits.
Special Thanks to Volunteers, supporters and well-wishers.
Krishnarpan